The Rigvedic Culture of the pre-historic Indus. p.53
From the above discussions it is evident that the Tantras are the common source of all the various systems of pictographic alphabets of the world. Ibid. p.76

१. मन्त्रसाधकयोराद्यो वर्णः स्यात् पार्थिवो यदि।
तत्कुलं तस्य तत्प्रोक्तमेवमन्येषु लक्षयेत्॥
पार्थिवे वारुणं मित्रमाग्नेये मारुतं तथा।
ऐन्द्रवारुणयोः शत्रुर्मारुतः परिकीर्तितः।
आग्नेये वारुणं शत्रुर्वारुणे तैजसं तथा।
सर्वेषामेव तत्त्वानां सामान्यं व्योमसम्भवम्।
परस्परविरुद्धानां वर्णानां यत्र सङ्गतिः।
स मन्त्रः साधकं हन्ति किं वा नास्य प्रसीदति॥

शारदातिलक० टीका, द्वितीय पटल, पृ० ७१

वर्ग	भूत				
	व्योम	वायु	अग्नि	जल	पृथ्वी
४	ङ	क	ख	घ	ग
५	ञ	च	छ	झ	ज
६	ण	ट	ठ	ढ	ड
७	न	त	थ	ध	द
८	म	प	फ	भ	ब
[1]९	श	ष	स	०	०

[2]इन वर्गों के देवता क्रमशः विरिञ्चि, विष्णु, रुद्र, अश्वि, प्रजापति तथा चार दिगीश्वर हैं। क्रिया, ज्ञान और इच्छा आदि उनकी शक्तियाँ हैं।

पिछले अध्यायों में मातृका-वर्णों का व्यापक विवेचन प्रस्तुत किया गया है। इससे स्पष्ट है कि वर्ण केवल साङ्केतिक ध्वनियाँ ही नहीं हैं उनके मूल में विश्वसंस्था और शरीरसंस्था के सम्पूर्ण संघटक, स्थापक और संहारक तत्त्व विद्यमान हैं। एक ओर जहाँ उनके द्वारा काम, क्रोध, लोभादिक उद्भावित होकर मनुष्य की आत्मा को अत्यन्त स्वार्थी और संकुचित बना डालते हैं, वहीं वर्णसमुदाय ही व्यक्ति को आत्मिक दृष्टि से अत्यन्त उदार एवं मुक्त करने की क्षमता भी रखता है। सत्य तो यह है कि वर्ण ही ज्ञान-विज्ञान की कुञ्जी है। सम्पूर्ण वाच्यात्मक विश्व, वाचक वर्णों के ही अधीन है।

---

१. अथ भूतलिपिं वक्ष्ये सुगोप्यामतिदुर्लभाम्।
यां प्राप्य शम्भोर्मुनयः सर्वान् कामान् प्रपेदिरे ॥ १ ॥
पञ्चह्रस्वा, सन्धिवर्णा, व्योमेराग्निजलं धरा।
अन्त्यमाद्यं द्वितीयं च चतुर्थं मध्यमं क्रमात् ॥ २ ॥
पञ्चवर्गाक्षराणि स्युर्वान्तं श्वेतेन्दुभिः सह।
एषा भूतलिपिः प्रोक्ता द्विचत्वारिंशदक्षरैः ॥ ३ ॥
आयम्बराणां वर्गाणां पञ्चमाः शार्णसंयुताः।
वर्गाद्या इति विज्ञेया नव वर्गाः स्मृता अमी ॥ ४ ॥

२. व्योमेराग्निजलक्षोणीवर्गवर्णान् पृथग्विदुः।
द्वितीयवर्गे भूर्नस्यात् नवमे न जलं धरा ॥ ५ ॥
विरिञ्चिविष्णुरुद्राश्विप्रजापतिदिगीश्वराः।
क्रियादिशक्तिसहिताः क्रमात्स्युः वर्गदेवताः ॥ ६ ॥
ऋषिः स्याद्दक्षिणामूर्तिः गायत्रं छन्द ईरितम्।
देवता कथिता सद्भिः साक्षाद्वर्णेश्वरी परा ॥ ७ ॥

शारदातिलक, ७ वां पटल।

सृष्टि के आदिम क्षण से ही शब्द और अर्थ अविनाभूत है। सूक्ष्म को आत्मसात् कर लेने पर समस्त स्थूल भी गृहीत हो जाता है इसमें कोई आश्चर्य की बात नहीं।

समस्त मातृका-वर्ण मन्त्रों अथवा विद्याओं के जनक हैं। अतः उन मन्त्रों को अर्थबोध एवं अर्थलाभ के कारण रूप में स्वीकार करना अनुचित नहीं—

अमूला तत्क्रमाज्ज्ञेया क्षान्ता सृष्टिरुदाहृता।
सर्वेषामेव मन्त्राणां विद्यानां च यशस्विनि ॥ ८ ॥
इयं योनिः समाख्याता सर्वतन्त्रेषु सर्वदा।

परात्रिंशिका

उसके पारमैश्वर्य का उपभोग है। अपूर्णता अथवा सङ्कोचमय भेदात्मक संसार के प्रशमन को रक्षा अथवा त्राण कहते हैं। इस प्रकार शक्ति के वैभव या विकासदशा में मननयुक्त तथा सङ्कोच या सांसारिक अवस्था में त्राणमयी— विश्वरूप विकल्प को कवलित कर लेनेवाली अनुभूति ही मन्त्र है—

मननमयी निजविभवे निजसङ्कोचमये त्राणमयी।
कवलितविश्वविकल्पा अनुभूतिः कापि मन्त्रशब्दार्थः ॥ ४८ ॥

महार्थमञ्जरी (संस्कृतच्छाया)

पूर्णाहन्ता[1] अथवा परावागात्मक अनुभूति ही मन्त्र है। यह अनुभूति निरन्तर तथाविध मनन या अनुसन्धि से उत्पन्न होती है और तभी संसार को क्षीण करनेवाला त्राण भी बन पड़ता है अन्यथा नहीं। मन्त्र शब्द की यह व्याख्या अत्यन्त सूक्ष्म और व्यापक है।[2] पूर्णाहन्ता ही महामन्त्र है जिसका शास्त्रों में मन्त्रवीर्य अथवा मन्त्रोपनिषद् के नाम से उल्लेख किया गया है। यह मन्त्र, चित् शक्ति का स्वस्वभाव है। 'चिच्छक्तेः स्वस्वभावो यः स मन्त्रः परिगीयते ॥' शिवसूत्रवार्तिक, द्वितीय प्रकाश।

[3]सामान्यतया वर्णसमुदायविशेष ही मन्त्र है। वर्णों अथवा वर्णभट्टारकों की शक्ति के सम्बन्ध में पर्याप्त प्रकाश डाला जा चुका है। विविध शक्तियों के पुञ्जरूप वर्णों से निर्मित होने के कारण मन्त्र अचिन्त्य शक्तिशाली है, इसमें सन्देह का अवसर नहीं। मायाशक्ति अतर्क्य और दुर्वार है और इसको भी

वैश्वात्म्यप्रथानुप्रविष्टतानुसन्धानोत्पादनद्वारा स्वस्वभावभङ्गप्रसङ्गरूपचाकित्य-व्यपोहनलक्षणं रक्षणं तन्मयी, हेतुद्वयेन वेद्यविक्षोभसर्वग्रासविशृङ्खलोल्लासायानुभूतिः स्वहृदयैकसंवेद्या विमर्शशक्तिः सैव मन्त्रः।

महार्थमञ्जरी, पृ १०२

१. पूर्णाहन्तानुसन्ध्यात्मा स्फूर्जन् मननधर्मतः।
संसारक्षयकृत्त्राणधर्मतो मन्त्र उच्यते ॥ सौभाग्यभास्कर, पृ० ५२
मोचयन्ति च संसाराद्योजयन्ति परे शिवे ॥ ७५ ॥
मननत्राणधर्मित्वात्तेन मन्त्र इति स्मृताः ॥

नेत्रतन्त्र, ११ अधिकार

दूर करने में समर्थ मन्त्र, माया से भी अधिक शक्ति-सम्पन्न है यह प्रतिपादित हो जाता है।[1]

ये[2] मन्त्र नित्य होते हैं; किन्तु इनकी नित्यता त्रिकालाबाधित नहीं है। क्योंकि अज्ञान की निवृत्ति के साथ-साथ स्वस्वरूप से अतिरिक्त कोई देवता रह नहीं सकता और उस देवता का वाचकमन्त्र तब भी वर्तमान रहे यह सम्भव नहीं। देवता के सूक्ष्म शरीर ही मन्त्र हैं और ये देव शरीर अविद्या समकालिक है, अविद्या के निवृत्त होते ही ये भी निवृत्त हो जाते हैं।

[3]शिव-सूत्र-विमर्शिनी में चित्त को मन्त्र कहा गया है। वस्तुतः[4] चित् शक्ति, स्व पद से उतर कर सङ्कोच को अङ्गीकार कर के चित्त का रूप ग्रहण करती है। स्वातन्त्र्यात्मक स्वरूप की सङ्कोचदशा ही चित्त है और विकास अवस्था ही चिति।[5] चित्त जब बाह्य वेद्य समूह को उपसंहृत करके अन्तर्मुख

---

१. मन्त्राणामचिन्त्यशक्तिता ॥ ८ ॥   परशुराम कल्पसूत्र

एतेन पूर्वोदितमाया अतर्क्या दुर्वारा, तथापि तन्निवारणे समर्थाः ततोऽयधिकशक्तिकाः, मन्त्रेषु लीलया ज्ञानावरकाविद्यानिवर्तकत्वशक्तिरस्ति इति प्रतिपादितम्।   वही,

२. वर्णात्मकाः नित्याः शब्दाः ॥ ७ ॥   वही,

वर्णात्मकाः वर्णसमुदायरूपाः शब्दा मन्त्राः नित्याःमूलाविद्यासमसत्ताकाः। न तु कालत्रयाबाध्यत्वं अज्ञाननिवृत्तौ स्वस्वरूपातिरिक्तदेवतायाः तद्वाचकमन्त्राणां च असत्वात्। न च आनुपूर्वीविशेषविशिष्टवेदादीनां नित्यत्वस्य एककल्पस्थायित्वस्य वर्तितत्वेन अस्यापि तादृशत्वेन कथं ततोऽपि चिरस्थायित्वरूपं नित्यत्वमिति वाच्यम्, मन्त्राणां देवतासूक्ष्मशरीरत्वेन देवताशरीरस्य अविद्यासमकालत्वात्।

सौभाग्यसुधोदय, प्रथम खण्ड

३. चित्तं मन्त्रः ॥ १ ॥   तृतीय उन्मेष

४. चितिरेव चेतनपदादवरूढा चेत्यसङ्कोचिनी चित्तम् ॥ ५ ॥

प्रत्यभिज्ञाहृदय

५. चेत्यते विमृश्यते परं तत्त्वमनेन इति चित्तम्; पूर्णस्फुरत्तासतत्वप्रासादप्रणवादिविमर्शरूपं संवेदनम्; तदेव मन्त्र्यते गुप्तम् अन्तरभेदेन विमृश्यते परमेश्वररूपं अनेन इति कृत्वा मन्त्रः। अतएव च परस्फुरतात्मकमननधर्मात्मता, भेदमयसंसारप्रशमनात्मकत्राणधर्मता च अस्य निरुच्यते। अथ च मन्त्रदेवताविमर्शपरत्वेन प्राप्ततत्सामरस्यं आराधकचित्तमेव मन्त्रः, न तु विचित्रवर्णसङ्घटनामात्रकम्।   विमर्शिनी, पृ० ४७

होकर चिद्रूपता के साथ अभेद विमर्श सम्पादित करना है तो यही उसकी गुप्त मन्त्रणा है जिसके कारण उसे मन्त्र की अभिधा मिलती है। अतः मन्त्रदेवता के विमर्श में तत्पर तथा उस देवता के साथ जिसने सामरस्य प्राप्त कर लिया है ऐसा आराधक का चित्त ही मन्त्र है, केवल विचित्र वर्णसंघटना ही नहीं। इस प्रकार मन्त्र की अब तक त्रिधा व्याख्या हुई। मन्त्र का प्रथम पूर्णाहन्तात्मक स्वरूप उसका चरमरूप है। इसीलिए उसको महामन्त्र की संज्ञा दी गई है। यही[1] गुरु वक्त्र अथवा शैवी[2] मुख है। यह परमशिव की प्राप्ति का मुख्य द्वार है। शब्द की यह चरमावस्था है; इसके आगे शब्द नहीं रहता। इसीलिए कहा गया है—

"शब्दब्रह्मस्वरूपेयं शब्दातीतं तु जप्यते।"

द्वितीय रूप है आराधक का चित्तात्मक मन्त्र और तृतीय वर्णभट्टारकात्मक।

यह विश्व ग्राहक और ग्राह्य इन दो अंशों में विभक्त है। ग्राहक ही चित्शक्ति का अहमंश है और ग्राह्य इदमंश। प्रमातृता अहमंश में और प्रमेयता इदमंश में विद्यमान रहती है। चैतन्य (चित्, चिति) ही परम-प्रमाता है। और चित्त या जीव अवम प्रमाता। चैतन्य के संकोच की जहाँ काष्ठा प्राप्ति है वही जीव अथवा संकुचित–प्रमाता अथवा सकल–प्रमाता के नाम से कहा जाता है। इससे ऊर्ध्वदेश में प्रलयाकल–प्रमाताओं की अवस्थिति है। ये प्रमातृगण प्रलयदशा में माया में अवस्थित रहते हैं। इनसे परे विज्ञानाकल या विज्ञानकेवली प्रमाता है जो क्रमशः मन्त्र, मन्त्रेश्वर अथवा विद्येश्वर और मन्त्रमहेश्वर के नाम से उल्लिखित हुए हैं। मन्त्र शुद्धविद्या तत्त्व में, मन्त्रेश्वर ईश्वरतत्त्व में और मन्त्रमहेश्वर सदाशिवतत्त्व में विद्यमान रहते हैं। छत्तीस तत्त्वमय विश्व के शुद्ध अध्वा और अशुद्ध अध्वात्मक दो विभाग हैं। माया से लेकर पृथ्वीतत्त्वपर्यन्त समग्र तत्त्व-समुदाय अशुद्ध अध्वा के अन्तर्गत है और शुद्धविद्या से लेकर शिव पर्यन्त शुद्ध अध्वा कहा

---

१. यावत्सा समनाशक्तिः तदूर्ध्वे चोन्मना‡ स्मृता।
नात्र कालः कलाश्चारो न तत्त्वं न च देवताः॥ १२७६॥
सुनिर्वाणं परं शुद्धं गुरुवक्त्रं तदुच्यते।
तदतीतं वरारोहे परं तत्त्वमनामयम्॥ १२७७॥
स्वच्छन्द०, १० पटल

२. शैवीमुखमिहोच्यते। विज्ञानभैरवतन्त्र, श्लोक २०

‡ मनो मननमात्ररूपमपि तत्र न क्रमते; न सम्भवति अपितु मन्त्ररूपैव इयं दशा। स्व० उद्योत, पृ० ५५६

जाता है। सकल और प्रलयाकल नामक प्रमातृ-वर्ग अशुद्ध अध्वा में और विज्ञानकेवली शुद्ध अध्वा के अन्तर्गत आते हैं। शुद्ध अध्वा में चित्प्राधान्य है और अशुद्ध अध्वा में चित्संकोच-प्राधान्य है।

[1]विज्ञानाकल नामक आत्मायें मायिक और कार्म मलों से मुक्त होती है; उनमें केवल आणव मल ही शेष रहता है। आणव मल के परिपाकगत तारतम्य के कारण ही उनमें उत्कर्षापकर्ष देखा जाता है। उत्कृष्ट विज्ञान-केवली आत्मा सदाशिवतत्त्व में निवास करते हैं। इन्हें ही मन्त्रमहेश्वर कहा जाता है। ईश्वरतत्त्व में मन्त्रेश्वरगण रहते हैं जो संख्या में आठ[2] हैं, भूतानु-ग्रह के कार्य में ये मुख्य कर्ता माने जाते हैं। ये मन्त्रों द्वारा प्राणियों पर अनु-ग्रह कराते हैं। अतः मन्त्र जीवोद्धाररूप व्यापार में साधन का कार्य करते हैं। मन्त्र[3] नामक प्रमातृगण संख्या में सात करोड़ हैं। सम्पूर्ण रोगों को दूर करने के कारण इन्हें रुद्र भी कहा जाता है।[4] शिवशक्ति से युक्त, त्रिनेत्र तथा चन्द्रमौलि ये मन्त्रगण शुद्धविद्यातत्व से ही उत्पन्न होते हैं और प्राणियों के भोग-मोक्षरूप अनुग्रह में तत्पर रहते हैं।

[5]त्रिधा भिन्न विज्ञानाकलों को स्वच्छन्दतन्त्र में आत्मा, अन्तरात्मा,

---

१. उत्तीर्णमायाम्बुधयो भग्नकर्ममहार्गलाः ।
अप्राप्तशिवधामानः त्रिधा विज्ञानकेवलाः ॥

२. अनन्तश्चैव सूक्ष्मश्च तथा चैव शिवोत्तमः ॥ ११६१ ॥
एकनेत्रैकरुद्रौ च त्रिनेत्रश्च प्रकीर्तितः ।
श्रीकण्ठश्च शिखण्डी च ज्ञेया विद्येश्वराः क्रमात् ॥ ११६२ ॥
स्वच्छन्द०, पटल १०

३. विद्यायाः पुनरीश्वरः ।
ज्ञानशक्तिकराग्रेण स्वेच्छया परमेश्वरः ॥ ५४ ॥
सप्तकोटीस्तु मन्त्राणां सृजेत् ज्ञानक्रियात्मिकाः ।
ते च सादाख्यपर्यन्ते पार्थिवाद्ये तु सुव्रते ॥ ५५ ॥
अनुग्रहं प्रकुर्वन्ति देहिनां भुवने स्थिताः ।
शिवशक्तिसमाविष्टास्त्रिनेत्राश्चन्द्रमौलयः ॥ ५६ ॥
वही, ११ पटल

४. रुद्राः सर्वरुग्द्राविणो मन्त्राः ; स्वच्छन्दोद्योत, ११ पटल, पृ० ४१

५. भूतभावविनिर्मुक्तस्तत्त्वधर्मकलोज्झितः ॥ ८७ ॥
मलधर्मैकयुक्तात्मा मायाधर्मतिरस्कृतः ।
निरात्मा तु तदा ज्ञेयः………… । स्वच्छन्द०, ११ पटल
यतो मायायाः पूर्वोक्तशक्तिरूपायाः, न तु तत्त्वात्मनः धर्मेण अख्यात्मात्मना

बाह्यात्मा, निरात्मा और परमात्मा का उल्लेख करते हुए निरात्मा के नाम से कहा गया है। स्थूल-सूक्ष्म आदि भूतों, बुद्धिधर्मरूप भावों, पुरुषतत्त्वात्मक धर्म तथा कलादि कञ्चुकों से रहित, अपूर्णमन्यतारूप आणव[1] मल से युक्त विज्ञानाकल प्रमाता ही निरात्मा है।

उपर्युक्त विवरण से मन्त्र एक ऐसे देवगण रूप में प्रतीत होते हैं जिनका उपयोग परमेश्वर अशुद्ध अध्वागत जीवों के उद्धार करने के लिए करते हैं।

[2]परात्रिंशिकाविवरण का मत विज्ञानाकलों के सम्बन्ध में कुछ भिन्न है। वहाँ कहा गया है कि माया से ऊर्ध्व और शुद्धविद्या से अधः महामाया विद्यमान है। इस महामायातत्त्व में ही विज्ञानाकलों की स्थिति है। इस प्रकार मन्त्रादि, विज्ञानाकलों से भिन्न होंगे।

[3]स्पन्दशास्त्र का मत है कि मन्त्र, चित्शक्ति का आधार लेकर सर्वज्ञत्व आदि बल से समन्वित होकर अनुग्रहरूप स्वाधिकार में प्रवृत्त होते हैं। उनका कोई आकार-विशेष नहीं होता। वे प्राणियों की इन्द्रियों के समान होते हैं। जब आराधक का चित्त आराध्य में लीन होता है तभी वे शिवात्मक, माया-कालुष्य से रहित मन्त्र भी वहीं चित्शक्ति में समाविष्ट हो जाते हैं।

रूपेण तिरस्कृतः सङ्कुचिताभासीकृतः। एवं भूतो निरात्मा, आत्मनः पूर्वोक्त-पाशशतवलितात् पुंस्त्वलक्षणात् स्वभावात् निष्क्रान्तः परमेशशास्त्रदृशा अभ्यस्त-मायापुंस्तत्त्वविवेकज्ञानो विज्ञानाकल इत्यर्थः। यदुक्तं श्री पूर्वे············ तत्रविज्ञान केवलः। मलैकयुक्तः··· ·········।१।२३।

स्वच्छन्दोद्योत, ११ पटल, पृ० ६२

१. मल अख्यात्यात्मकः आणवः, शुभादिवासनात्मकं कर्म, कलादिकं तु मायीयम्। स्वच्छन्दोद्योत, ११ पटल, पृ० ४५

२. तथाहि मायातत्त्वस्य उपरि विद्यातत्त्वाधश्च अवश्यं तत्त्वान्तरेण भवितव्यम्—यत्र विज्ञानाकलानां स्थितिः। यथोक्तम्—मायोर्ध्वे शुद्धविद्याधः सन्ति विज्ञानकेवलाः। परात्रिंशिका, पृ० ११७

३. तदाक्रम्य बलं मन्त्राः सर्वज्ञबलशालिनः।
प्रवर्तन्तेऽधिकाराय करणानीव देहिनाम्॥ २६॥
तत्रैव सम्प्रलीयन्ते शान्तरूपा निरञ्जनाः।
सहाराधकचित्तेन तेन ते शिवधर्मिणः॥ २७॥

स्पन्दकारिका, द्वि० निःष्यन्द।

[1]नेत्रतन्त्र में देवी ने परमेश्वर से मन्त्र के सम्बन्ध में निम्नांकित प्रश्न किये हैं, जिनके उत्तरों द्वारा मन्त्र-विज्ञान पर समुचित प्रकाश पड़ता है।

१. मन्त्रों की आत्मा क्या है ? अर्थात् शम्भु, शक्ति और अणु इनमें से मन्त्रों का अधिष्ठाता कौन है ?

२. मन्त्रों का स्वरूप कैसा है ? वे आकारवान् हैं अथवा निराकार ?

३. कोई दृष्टान्त जिससे मन्त्रों की तुलना की जा सके ? लोक में निराकार कर्ता नहीं दिखाई देते; कुम्भकार के सदृश साकार भी कर्ता सब कुछ नहीं रच सकते।

४. मन्त्रों का सामर्थ्य ?

५. यदि वे भोग, मोक्ष और दोष प्रशमनरूप सामर्थ्य रखते हैं तो किस प्रकार ? निराकार व्योम के सदृश उनमें शक्तता सम्भव नहीं। आकृतिमान् व्यक्ति में आंशिकता और मलिनता होती है अतः अस्वतन्त्र होने पर उसकी शक्ति कैसी ?

६. मन्त्र किसके द्वारा प्रेरित होते हैं ?

प्रथम प्रश्न सतर्कता के साथ प्रस्तुत करते हुए देवी ने जिज्ञासा की है कि—

यदि मन्त्र शिवात्मक है तो उनकी व्यापकता और शून्यता में सन्देह नहीं। अतः क्रिया-करणहीन मन्त्रों में कर्तृता कैसे सिद्ध हो सकती है ? और अमूर्त होने के कारण उनमें कर्तृता का उपपादन नहीं किया जा सकता क्योंकि बिना शरीर के कोई कार्य नहीं कर सकता[2]।

---

१. मन्त्राः किमात्मकाः देव किंस्वरूपाश्च कीदृशाः।
किं प्रभावाः कथं शक्ताः केन वा सम्प्रचोदिताः॥ १॥

एकविंश अधिकार

शिवात्मकास्तु चेद्देव व्यापकाः शून्यरूपिणः।
क्रियाकरणहीनत्वात् कथं तेषां हि कर्तृता॥ २॥

२. अमूर्तत्वात्कथं तेषां कर्तृत्वं चोपपद्यते।
विग्रहेण बिना कार्यं कः करोति वद प्रभो॥ ३॥
न दृष्टो ह्यशरीरस्य व्यापारः परमेश्वर।
शरीरिणो यतो बन्धः कथं बद्धस्य कर्तृता॥ ४॥
एवं शिवात्मका मन्त्राः कथं सिद्धयन्ति वस्तुतः॥ ५॥
अथ चेच्छक्तिरूपास्ते कस्य शक्तिस्तु कीदृशी।
शक्तिः किं कारणं देव कार्यं तस्याश्च कीदृशम्॥ ६॥
यावन्न शक्तिमान् कश्चित् कस्य शक्तिर्विधीयते।
स्वतन्त्रा न प्रसिध्येत्त विना सिद्धेन केनचित्॥ ७॥

यदि मन्त्रों को शरीरी माना जाय तो जो स्वयं मलिन अस्वतन्त्र और बंधा हुआ है वह दूसरे का क्या उद्धार करेगा ? कर्ता शक्तिहीन हो ऐसा उचित नहीं। इस प्रकार मन्त्र शिवात्मक है, यह कथन सिद्ध नहीं होता।

यदि शक्ति को मन्त्रों की आत्मा माना जाय तो यह प्रश्न उपस्थित होता है कि वह शक्ति किसकी है और उसका स्वभाव कैसा है ? उसके सहकारी कारण और कार्य के स्वरूप का भी निर्देश करना होगा। जब तक शक्तिमान् न हो तो वह शक्ति किसकी कही जायगी ? मन्त्र केवल शक्तिरूप हैं शैव तेज का उनमें स्पर्श नहीं है, यह कहना भ्रम मात्र है। क्योंकि बिना प्रसिद्ध अग्नि आदि धर्मी के दाहकत्व आदि में नहीं देखे जाते, अतः स्वतन्त्र शक्ति सम्भव नहीं।

[1]यदि मन्त्रों को आणव—विग्रहाकार माना जाय तो वे भी जीव के

जो कुछ दिखाई देता है तीन तत्त्वों से निर्मित है। अतः मन्त्र शिव, शक्ति और अणु स्वरूप हैं; वे अमित सामर्थ्यशाली हैं।

परतत्त्व सर्वात्मक, शुद्ध, अनादि कारण, ध्रुव आदि अनेक गुण-गणों का आश्रय है। अग्नि की ऊष्मा के सदृश उस शिवतत्त्व की एक पराशक्ति है जो उससे सर्वथा अभिन्न है। शक्ति को सानन्द और शिव को निरानन्द कहा जाता है क्योंकि निःशेष रूप से महासामरस्य विश्रान्त्यात्मक आनन्द उसमें वर्तमान रहता है। शिव[1] एक है और उसकी शाश्वती शक्ति भी एक ही है; वह शिव से अभिन्न और अद्वैत रूप में अवस्थित रहती है। शिव की सर्व-शक्तिमत्ता ही उसकी शक्ति है जिसके द्वारा वह सृष्टि, स्थिति, संहार, तिरोधान और अनुग्रहरूप पञ्चकृत्य करता रहता है।[2] आणव मल से संकुचित अणु रूप आत्मा अनन्त है। ये परमेश की परा इच्छा द्वारा अनुगृहीत हैं अर्थात् चित्प्रकाशस्वरूप हैं। इस प्रकार शिव, शक्ति और आत्मा ये तीन ही श्रेष्ठ तत्व हैं।[3] पूर्णकाम शिव अपनी उसी स्वातन्त्र्यात्मक शक्ति द्वारा चराचर जगत् की रचना करते हैं। शक्ति सबका उपादान कारण है।

इस प्रकार मन्त्र त्रितत्त्वज हैं। शिव, शक्ति और आत्मा इनके समुदित

१. एकः शिवस्तथैका तु शक्तिरेव हि शाश्वती।

रूप को ही मन्त्र की संज्ञा दी जाती है।[1] ये मन्त्र अमित तेजधारी, संसार से मोचन और शिवत्व की अभिव्यक्तिरूप अधिकार वाले होते हैं। मनन और त्राणधर्मा ये मन्त्र नित्य अनुग्रह करने वाले, शिव और शक्ति के प्रभाव से सम्पन्न भोग और मोक्ष के दाता हैं। सर्वज्ञता और सर्वशक्तिमत्ता ही उनका शिवत्व है और सर्वकर्तृता शक्तितत्व।

प्रत्येक मन्त्र में वाच्य और वाचक नामक दो शक्तियाँ विद्यमान रहती हैं। वाच्यशक्ति मन्त्र की आत्मा अथवा सूक्ष्म शक्ति है। इसे ज्योतिर्मयी कहा जाता है। मन्त्र का वर्णानुपूर्वीमय स्थूल रूप ही मन्त्रमय वाचक देवता है। जिसके जागरण के बिना वाच्य का बोध नहीं हो सकता। शब्दब्रह्म ही परावाक् अथवा अखण्ड अद्वयशक्ति है और वाच्यवाचकात्मक मन्त्र उसी के एक संकुचित स्फुरणमात्र। शब्दब्रह्म-रूप अपर-ब्रह्म का अतिक्रमण करने पर शब्दातीत परब्रह्म की पदवी प्राप्त की जा सकती है।

मन्त्र और प्रार्थना में कहाँ तक साम्य और वैषम्य है इसका भी विवेचन आवश्यक है। इसमें सन्देह नहीं कि मन्त्र में वर्णों और पदों की आनुपूर्वी नियत रहती है और प्रार्थना में आनुपूर्वी वही रहे ऐसा नियम नहीं है। एक ही आशय भिन्न-भिन्न पदों द्वारा अभिव्यक्त किया जा सकता है और किया जाता है। प्रार्थना और मन्त्र में यह आधारभूत वैषम्य है। यहाँ यह प्रश्न अवश्य उपस्थित होता है कि यदि प्रार्थना की आनुपूर्वी भी नियत हो तो वह मन्त्र बन सकती है या नहीं? सत्य तो यह है कि समस्त वर्ण मन्त्रस्वरूप ही हैं और उनसे निर्मित पद मन्त्र नहीं होंगे यह नहीं कहा जा सकता। अतः नियत आनुपूर्वी से सम्पन्न प्रार्थना भी कालान्तर में मन्त्र पदवी प्राप्त कर सकती है इसमें कोई बाधा नहीं। कालान्तर का प्रयोग इसलिए समीचीन है क्योंकि उस प्रार्थना में नाना साधकों की प्रबुद्ध चेतना का आधान आवश्यक है। अथवा एक ही उत्कृष्ट कोटि के साधक की प्रबल तपश्चर्या से वह प्रार्थना जीवन्त हो गई हो तो दूसरों के लिए वह मन्त्र का कार्य करेगी इसमें संशय नहीं। पौराणिक स्तुतियों एवं सन्तों द्वारा रचित आधुनिक रचनाओं का जनता द्वारा निरन्तर पाठ किये जाने के मूल में यही तथ्य निहित है और सफलता प्रदान करने वाली अनुभूति भी इसकी साक्षी है।

स्तुतियों में अंशतः गुण-कीर्तन और अंशतः आशीः या कामनाओं का सन्निवेश हो सकता है और होता है। कुछ स्तोत्र ऐसे भी सम्भव हैं जिनमें केवल गुण-कीर्तन हो। इसीलिए कभी कभी स्तुति और प्रार्थना में अन्तर भी

---

१. द्रष्टव्य 'गारलैण्ड आफ लेटर्स', पृ० १४५

देखा जाता है। सन्तों की रचनाओं में भी ऐसा ही है। शास्त्रीय अथवा परम्पराप्राप्त मन्त्रों में भी ठीक ऐसी ही बात है।

मन्त्रात्मक शब्द में दो प्रकार के अर्थ देखे जाते हैं—एक तो देवता और दूसरा गुण-कीर्तन या आशीः। ये दोनों अर्थ वस्तुतः भिन्न नहीं हैं। जहाँ तक गुणकीर्तन का सम्बन्ध है वह तो देवता के स्वरूप की ही ख्याति है। और आशीः या प्रार्थना उसके सामर्थ्य का बोधक है। इस प्रकार मन्त्र के दोनों वाच्यार्थों में कोई पार्थक्य नहीं है।

कुछ लोग मन्त्र का अर्थ 'आमन्त्रण' करने के पक्ष में हैं। आमन्त्रण से तात्पर्य है धर्म, अर्थ, काम और मोक्ष का आमन्त्रण। मन्त्र प्रबुद्ध होने पर उपर्युक्त चतुर्वर्ग को निकट लाने में समर्थ होता है। मन्त्र-प्रबोधन अथवा मन्त्र-चैतन्य किये बिना मन्त्र का सामर्थ्य प्रकट नहीं होता। साधक की अपनी शक्ति सक्रिय होकर मन्त्रशक्ति को जप के द्वारा प्रबुद्ध करती है। जीवगत या जैवी शक्ति मन्त्रशक्ति अथवा दैवीशक्ति से मिलकर एकाकार हो जाती है और तब उसके द्वारा साधक की कामनाओं की पूर्ति होती है।

मन्त्र अनेक प्रकार के होते हैं। उनकी नाना जातियाँ हैं। सबसे पहला भेद है मूलमन्त्र अथवा महामन्त्र। इतर मन्त्र इसी के गर्भ से जन्म लेते हैं; यही कारण है कि उसे उपर्युक्त आख्यायें प्रदान की गई हैं। अन्य भेद निम्नांकित हैं :—

१. पुं मन्त्र, स्त्री मन्त्र, नपुंसक मन्त्र।
२. सिद्ध, साध्य, सुसिद्ध, अरिमन्त्र।
३. पिण्ड, कर्तरी, बीज, मालामन्त्र।
४. सात्विक, राजस, तामस।
५. साबर, डामर।

पुं मन्त्र उन्हें कहते हैं जिनका देवता पुरुष होता है।[1] पुरुष देवता के मन्त्र सौर होते हैं, और स्त्री देवता से सम्बन्ध रखने वाले सौम्य। जिन मन्त्रों का देवता स्त्री होता है उन्हें 'विद्या' कहते हैं। सामान्यतया तो सभी को मन्त्र ही कहा जाता है।[2] कुछ सम्प्रदायविद्, जिन मन्त्रों के अन्त में 'हुँ'

---

१. सौराः पुं देवता मन्त्रास्ते च मन्त्राः प्रकीर्तिताः।
सौम्याः स्त्रीदेवतास्तद्वद्विद्यास्ते इति विश्रुताः॥
प्रयोगसार, शारदातिलक की राघवी टीका, पृ० ७९

२. पुंस्त्रीनपुंसकात्मानो मन्त्राः सर्वे समीरिताः।
मन्त्राः पुंदेवता ज्ञेया विद्याः स्त्रीदेवताः स्मृताः॥ ५८॥
शारदातिलकतन्त्र, २ पटल

और 'फट्' रहता है, उन्हें पुं मन्त्र और दो 'ठः' इस वर्ण से जिस मन्त्र की समाप्ति होती है, उसे स्त्री मन्त्र कहते हैं। इसके अतिरिक्त 'नमः' से समाप्त होने वाले मन्त्र नपुंसक हैं।[1] प्रयोगसार का मत इससे कुछ भिन्न है। वहाँ 'वषट्' और 'फट्' से समाप्त होने वाले मन्त्रों को पुरुष, 'वौषट्' और 'स्वाहा' से स्त्री तथा 'हुं' 'नमः' से समाप्त होने वालों को नपुंसक कहा गया है।

[2]सिद्धमन्त्र बान्धव, साध्य सेवक, सुसिद्ध पोषक और अरिमन्त्र घातक कहे गये हैं। कौन-सा मन्त्र सिद्ध है और कौन साध्य इसका निर्णय साधक के नाम के आदि वर्ण तथा राशि-चक्र के निर्दिष्ट वर्णों की अनुकूलता और प्रतिकूलता से जाना जाता है। इसका विस्तृत विवरण शारदातिलकतन्त्र के द्वितीय पटल और तन्त्रराजतन्त्र में उपलब्ध है।

[3]जिन मन्त्रों में केवल एक ही अक्षर होता है उन्हें पिण्ड मन्त्र कहते हैं, दो अक्षरों वाले कर्तरी कहलाते हैं। तीन वर्णों से लेकर नौ वर्णों तक बीज मन्त्र; और दश से बीस वर्ण पर्यन्त मन्त्र के ही नाम से कहे जाते हैं। इससे ऊपर संख्या वालों को मालामन्त्र कहते हैं। ये अपरिमित है, इनके भेदों की गणना नहीं की जा सकती।

साबरमन्त्रों की चर्चा प्रायः की जाती है। सुप्रसिद्ध तन्त्रों में 'योगिनी जालशम्बरम्' नामक एक ग्रन्थ था। सम्भव है शम्बर का ही अपभ्रंश रूप साबर हो। साबरमन्त्रों का शास्त्रीय रूप क्या था, नहीं कहा जा सकता।

पुं मन्त्रा हुम्फडन्ताः स्युर्द्विठान्ताश्च स्त्रियो मताः।
नपुंसका नमोऽन्ताः स्युरित्युक्ता मनवस्त्रिधा॥ ५९॥

शारदातिलकतन्त्र, २ पटल

१. वषट्फडन्ताः पुंलिङ्गा वौषट्स्वाहान्तगाः स्त्रियः।
नपुंसका हुंनमोऽन्ता इति मन्त्रास्त्रिधा स्मृताः॥

राघवभट्टीया, पृ० ८०

विख्यात सन्त तुलसीदास ने रामचरितमानस में इनके उमा-महेश्वर द्वारा रचे जाने का उल्लेख किया है और साथ ही यह भी कहा है कि यद्यपि इन मन्त्रों के अक्षर बेमेल और अर्थहीन होते हैं फिर भी इनका प्रभाव देखा जाता है।[1]

डामरमन्त्र तत्काल सिद्धि प्रदान करते हैं। किन्तु उनका फल स्थायी नहीं होता। ये मन्त्र केवल चमत्कार दिखाने के काम आते हैं।

इसके अतिरिक्त मन्त्रों के निम्नांकित अन्य भेद भी होते हैं—

१. छिन्न[2]	१३. तिरस्कृत	२५. निर्स्त्रिशक
२. रुद्ध	१४. भेदित	२६. निर्बीज
३. शक्तिहीन	१५. सुषुप्त	२७. सिद्धिहीन
४. पराङ्मुख	१६. मदोन्मत्त	२८. मन्द
५. उदीरित	१७. मूर्च्छित	२९. कूट
६. बधिर	१८. हृतवीर्य	३०. निरंश
७. नेत्रहीन	१९. हीन	३१. सत्त्वहीन
८. कीलित	२०. प्रध्वस्त	३२. केकर
९. स्तम्भित	२१. बालक	३३. बीजहीन
१०. दग्ध	२२. कुमार	३४. धूमित
११. भीत	२३. युवा	३५. आलिङ्गित
१२. मलिन	२४. प्रौढ़	३६. मोहित
		३७. क्षुधातुर

१. कलि बिलोकि जग हित हरगिरिजा। साबर मन्त्र जाल जिन सिरजा।
अनमिल आखर अरथ न जापू। प्रकट प्रभाव महेस प्रतापू॥
रामचरितमानस

२. छिन्नो रुद्धः शक्तिहीनः पराङ्मुख उदीरितः॥ ६४॥
बधिरो नेत्रहीनश्च कीलितः स्तम्भितस्तथा।
दग्धस्त्रस्तश्च भीतश्च मलिनश्च तिरस्कृतः॥ ६५॥
भेदितश्च सुषुप्तश्च मदोन्मत्तश्च मूर्च्छितः।
हृतवीर्यश्च हीनश्च प्रध्वस्तो बालकः पुनः॥ ६६॥
कुमारस्तु युवा प्रौढ़ो वृद्धो निर्स्त्रिशकस्तथा।
निर्बीजः सिद्धिहीनश्च मन्दः कूटस्तथा पुनः॥ ६७॥
निरंशः सत्त्वहीनश्च केकरो बीजहीनकः।
धूमितालिङ्गितौ स्यातां मोहितश्च क्षुधातुरः॥ ॥ ६८॥
शारदातिलक, २ पटल

३८. [1]अतिदृप्त	४५. स्थानभ्रष्ट	५२. दारित
३९. अङ्गहीन	४६. विकल	५३. मूल
४०. अतिक्रुद्ध	४७. अतिवृद्ध	५४. नग्न
४१. समीरित	४८. निःस्नेह	५५. भुजङ्गम
४२. अतिक्रूर	४९. पीड़ित	५६. शून्य
४३. सव्रीड	५०. मीलित	५७. हत
४४. शान्तमानस	५१. विपक्षस्थ	

इनके सम्बन्ध में पृथक्-पृथक् विवरण शारदातिलकतन्त्र के द्वितीय पटल में देखना चाहिए। दूषित मन्त्रों के शोधन की भी अत्यन्त आवश्यकता होती है।[2] किन्तु यह शोधन काम्य कर्मों में ही अपरिहार्य माना गया है, मुक्त्यर्थ इनमें संस्कार की आवश्यकता नहीं समझी जाती। मन्त्रों के दश प्रकार के संस्कार प्रसिद्ध हैं—

१. जनन	४. बोधन[3]	७. आप्यायन
२. जीवन	५. अभिषेक	८. तर्पण
३. ताड़न	६. विमलीकरण	९. दीपन
		१०. गुप्ति

जनन—मातृकावर्णों के मध्य से मन्त्र का उद्धार ही जनन है। इसमें शुभ पीठ आदि में कुङ्कुम अथवा रोचना द्वारा मातृका-कमल की रचना

---

१. अतिदृप्तोऽङ्गहीनश्च अतिक्रुद्धः समीरितः।
अतिक्रूरश्च सव्रीडः शान्तमानस एव च ॥ ६९ ॥
स्थानभ्रष्टश्च विकलः सोऽतिवृद्धः प्रकीर्तितः।
निस्नेहः पीडितश्चापि.................. ॥

शारदातिलक, २ पटल।

आदिशब्दात् मीलितविपक्षस्थदारितमूकनग्नभुजङ्गमशून्यहतादयो दोषा ज्ञेयाः। शा० ति० टीका, पृ० ९५, २ पटल।

२. काम्यकर्मस्वित्यनेन मुक्त्यर्थं मन्त्रजपे एतद्दोषाभावाद्दशसंस्कारा अपि न कर्तव्या।

शारदातिलक टीका, पृ० ९४

३. मन्त्राणां दश संस्काराः कथ्यन्ते सिद्धिदायिनः।
जननं जीवनं पश्चात् ताडनं बोधनं तथा ॥ ११२ ॥
अथाभिषेको विमलीकरणाप्यायने पुनः।
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ॥ ११३ ॥

वही

करके देय मन्त्र के एक-एक अक्षर का मातृकाब्ज से उद्धार किया जाता है ।

जीवन—मन्त्र वर्णों को प्रणव से अन्तरित करके जप करना ही जीवन है । इस प्रकार मन्त्र की सौ आवृत्ति करनी चाहिए। पिङ्गला मत में इसे जीवन न कह कर 'बीजन' की संज्ञा दी गई है। प्रणव ही बीज है अतः उसके द्वारा अन्तरिक्ष मन्त्र बीजित कहा जाता है ।

ताड़न—मन्त्र वर्णों को भूर्जपत्र पर लिख कर चन्दन के जल से वायु बीज (यं) का उच्चारण करते हुए सौ बार ताड़न करना चाहिए ।

बोधन—लिखित मन्त्र को करवीर (कनेर) के पुष्पों द्वारा वह्निबीज का उच्चारण करते हुए ताड़न करना ही बोधन है ।

अभिषेक—भूर्जपत्र पर लिखे हुए मन्त्र को एक सौ आठ बार पिप्पल के प्रवाल से अभिषिक्त करना ही अभिषेक है। मत-विशेष में अभिषेक की संख्या मन्त्रों के वर्णों के अनुसार समझनी चाहिए ।

विमलीकरण—ज्योतिर्मन्त्र (प्रणव) के द्वारा मन में चिन्तित मन्त्र के सहज, आगन्तुक और मायीय मलों को जलाना विमलीकरण है ।

आप्यायन—कुशोदक द्वारा एक सौ आठ बार मन्त्र का प्रोक्षण आप्यायन कहा जाता है ।

तर्पण—देय मन्त्र का जल द्वारा एक सौ आठ बार तर्पण ही तर्पण है ।

दीपन—तार, माया और रमा बीज से मन्त्र को युक्त करना दीपन कहलाता है ।

गोपन—जपे जाने वाले मन्त्र को अप्रकाशित करना ही गोपन है ।

मन्त्र ऋणी और धनी भी होते हैं । रुद्रयामल की प्रक्रियानुसार वर्ण-चक्र

वेदवादियों में प्रतीक विज्ञानात्मक द्रव्य यज्ञ के अतिरिक्त—जिसका उल्लेख ब्राह्मणग्रन्थों में एवं विशदीकरण आगे चलकर जैमिनि द्वारा हुआ था—ब्रह्मयज्ञ[1] (जपयज्ञ) को मान्यता देनेवाला एक पुरातन सम्प्रदाय विद्यमान था। इस मत में मन्त्रों का विनियोग विभिन्न प्रायश्चितों तथा अभ्युदय और निःश्रेयस की प्राप्ति के लिए होता था। शौनक ने इसी सम्प्रदाय का ऋग्विधान[2] में पोषण किया है। तान्त्रिकमन्त्रों का भी यही उद्देश्य है, यह सर्वविदित है। मन्त्र एवं वर्णगत देवताओं का जैसा तान्त्रिक विवरण मिलता है वेदों में उसका अंकुर स्फुट रूप में सुलभ है। ऋग्वेद में मन्त्रमय देवशक्तियाँ, अकार, उकार और मकार के देवता, भुवन, वेद तथा जन एवं तीनों वर्णों के समाहृत रूप ओङ्कार की परमाक्षरता, त्रिकालातीतत्व, वेदसारता, अमृतत्व और जगत्कारणता का निर्देश किया गया है—

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते॥

ऋ० १, मं० १६४, सू० ३९

'परमे व्योमन्—निरतिशय अधिष्ठान, अक्षरे—प्रणवरूप अविनाशी शब्दतत्त्व में, ऋचः—सम्पूर्ण ऋगुपलक्षित मन्त्र विद्यमान हैं तथा, यस्मिन्—जिन ऋचाओं अथवा प्रणव में, विश्वे देवा अधिनिषेदुः—सभी देव अवस्थित हैं, यः तत् न वेद—जो प्रणवाक्षर एवं उन मन्त्रों के उपर्युक्त तत्त्व को नहीं जानता, किमृचा करिष्यति—उसे ऋचाओं से क्या सिद्धि मिलेगी, ये इत् तत्विदुः—और जो लोग इस तत्व को जानते हैं, वे, इमे समासते—वे इन देवों के साथ तादात्म्य लाभ करते है।

यद्यपि इस मन्त्र के भिन्न-भिन्न अर्थ किये गये हैं फिर भी स्कन्द-स्वामी, दुर्गाचार्य, वेङ्कटमाधव, शाकपूणि, यास्क तथा ब्राह्मण और आरण्यक ग्रन्थ उपर्युक्त अर्थ की ही पुष्टि करते हैं[3]।

---

१. 'यत्स्वाध्यायमधीयीतैकामृचं यजुः साम वा तद् ब्रह्मयज्ञः।

तै० आ० १।१०।६

२. स्तेयं कृत्वा द्विजो मोहात् त्रिरात्रोपोषितः शुचिः।
सूक्तं जप्त्वास्यवामीयं क्षिप्रं मुच्येत किल्विषात्॥

ऋग्विधान १।२६

उद्यन्नद्येति मन्त्रोऽयं सौरः पापप्रणाशनः।
रोगघ्नश्च विषघ्नश्च भुक्तिमुक्तिफलप्रदः॥ वही।

३. वेङ्कटमाधव—अथादित्यस्य यद्वाचकमक्षरं तत्स्तौति—यस्मादक्षरण-स्वभावात् सर्वा ऋचो विनिर्गताः यस्मिश्च सर्व एव। देवा ऋक्षु दृश्यमाना

परम व्योम, साक्षी चेतन अथवा ब्रह्म का निवास स्थान है, ऐसी वैदिक मान्यता है। 'योस्याध्यक्षः परमे व्योमन्' (नासदीय सूक्त) से यह बात

अन्ये च वर्तन्ते यः तदक्षरं न वेत्ति सः किं ऋचा करिष्यति ये एव तद्विदुः ते इमे नक्षत्ररूपेण दिवि आसते ओमिति प्रतिपद्यन्ते—'एतद्वै यजुः त्रयीं विद्यां प्रत्येषा वागेतत्परममक्षरम्। तदेतत् ऋचाभ्युक्तम्—ऋचो अक्षरे परमे व्योमन्।'—इति ब्राह्मणम्। (ऋगर्थदीपिका)।

स्कन्दस्वामी—एतदक्षरं, परमं चेदं व्योम स्थानम्। अग्न्यादिनानादेवतानां मन्त्राणां सर्वस्याश्च त्रय्याः तदध्ययनस्य चोङ्कारपूर्वकत्वात् अथवा परमेतज्जगतः। कथम् ? विमोतत्वात् (विविधं जगतामोतत्वात्)। इदं प्रणवाख्यं ब्रह्म जगतः कारणमित्युपनिषत्सु वर्णितम्। तस्य किलोमित्येतस्य ब्रह्मणः प्रथमायां मात्रायां पृथिव्यग्निर्ऋग्वेदः पृथिवीनिवासिनो जना इत्येतत्। द्वितीयायां मात्रायां अन्तरिक्षं वायुर्यजूंषि अन्तरिक्षनिवासिनो जना इत्येतत्। तृतीयायां द्यौरादित्यः सामानि द्युनिवासिनो जना इत्येतत्। तेनेदं जगतः परं व्योम अथवा परमं व्योम—'मृत्योर्बिभ्यतां देवानां—तदेतत् परस्मिन् पादे वक्ष्यते, तस्मिन्नेवं रूपे परमे व्योमन् लुक् सप्तम्याः'। देवा वै मृत्योर्बिभ्यतः त्रयीं विद्यां प्राविशन् ते छन्दोभिराच्छादयन्—तच्छन्दसां छन्दस्त्वम्। ते नु तत्र मृत्युर्यथा मत्स्यं उदके परिपश्येदेवं पर्यपश्यदृचि साम्नि यजुषि। ते न विस्त्वोर्ध्वा ऋचः साम्नो यजुषः स्वरमेव प्राविशन्। यदा वा ऋचमाप्नोति ओमित्येवं स्वरति एवं सामैनं यजुरेषः उ स्वरो यदेतदक्षरं एतदमृतमभयं तत् प्रविश्य देवा अमृता अभया अभवन्।" छा० १।४।४।

तदेतदिहोच्यते यस्मिन् देवाः सर्वे मृत्योर्बिभ्यतोधिनिषण्णाः प्रविष्टा इत्यर्थः। अथवा ऋगादीनामध्ययनमोङ्कारपूर्वकत्वाद् ऋगादयः सर्वे मन्त्राः अत्र निषण्णाः। तेन च तेषां या देवताः ता अपि तद्द्वारेणात्र निषण्णाः इत्येतदभिप्रेत्यैतदुच्यते—देवरूपमक्षरं—सः, ताद्रूप्याप्राप्तेः। इच्छब्दस्तु शब्दस्यार्थे, ये तु, य एतदेवं विद्वान् अक्षरं प्रणौति एतदेवाक्षरं स्वरममृतमभयं प्रविशति। तत्प्रविश्य 'यदमृतास्तदमृतो भवति' छा० उ० १।४।५—यदमृता देवास्तदमृतो भवति इति पूर्वस्येतिहासस्योपसंहारश्रुतेस्तास्ताद्भाव्यापत्त्या प्रणवविग्रहात्मानमनुप्रविश्य ब्रह्मणः साम्यमापन्ना इमे समासते। समित्येकीभावे, तेन सहैकीभूता आसते।

दुर्गाचार्य—विविधमस्मिन् शब्दजातमोतमिति व्योम। तस्मिन् तिसृषु मात्रासु अकारोकारमकारलक्षणासु उपशान्तासु यदवशिष्यते तदक्षरं परमं व्योम। अपरमाकाशमपेक्ष्य तत् परं व्योम। शब्दसामान्यमभिव्यक्तमित्यभिप्रायः। ओङ्कारमृते नह्यर्चयन्ति तस्याः। ऋगादिषु ये देवा ते मन्त्रद्वारेणाक्षरे निषण्णाः तस्य शब्दकारणत्वात्। अनया विभूत्याक्षरम् ऋगादिभिर्मन्त्रैः यस्त-

स्पष्ट है। इसके अतिरिक्त शब्दतत्त्व का भी यह बोधक है जो वैदिक वाक् तत्त्व से भिन्न नहीं है। "इस परमव्योम रूप शब्द अथवा वाक्तत्त्व को आधार बनाकर वसु, रुद्र, आदित्य आदि देवगण तथा कर्मदेव, आजानदेव, अभिमानीदेवता, नित्य देवता, जीवन धारण करते हैं; समस्त पशु, मनुष्य तथा गन्धर्व आदि इसी के द्वारा प्रतिष्ठित हैं। सम्पूर्ण भुवन भी इसी में समर्पित है। यह वाक् इन्द्रपत्नी है। अक्षर स्वरूप वाग्देवी का सर्वप्रथम प्रादुर्भाव हुआ। यह वेदों की माता तथा अमृत की नाभि है[1]।" तन्त्रों का शक्तितत्त्व यही है और इस पर अधिष्ठित ब्रह्म, शिवतत्त्व। 'यावद्ब्रह्म विष्ठितं तावती वाक्'

ह्माक्षरात्मना पश्यति। ते हि तत्परिज्ञानात् तादभाव्यमुपगताः प्रणवविग्रह-मात्मानमनुप्रविश्य समीकृता निर्वान्ति शान्तार्चिष इवानलाः इति।

आचार्य शाकपूणि—अपरे प्रकारान्तरेण प्रतिपादयन्ति—ऋचोक्षरे ऋगु-पलक्षितसर्ववेदसम्बन्धिन्यक्षरे प्रणवरूप ओङ्कार अविनाशिनि सर्ववेदेषु व्याप्तं वा प्रणवस्य सर्ववेदसारत्वं ब्राह्मणे श्रूयते—"तान् वेदानभ्यतपत् तेभ्योऽभितप्ते-भ्यस्त्रयो वर्णा अजायन्ताकार उकारौ मकार इति तानेकधा समभरत् तदेतदो-मिति—(ऐतरेय ब्रा० ५।३२) परमे निरतिशये नहि प्रणवादधिकं किञ्चिन्मन्त्र-जातमस्ति त्रिकालातीतस्य ब्रह्मणः प्रतिपादकत्वात्।" यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव (वा० उ० १) "ओमिति ब्रह्म"–(तै० आ० ७।४) इत्यादि श्रुतेः। वेदानां प्रणवस्य स्थानप्रतिनिधिभावः सम्बन्धः। 'यः ऋचोऽधीते' इत्याद्युपक्रम्य यः प्रणवमधीते स सर्वमधीत ओमिति प्रतिपद्यत एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत् परममक्षरम् (तै० आ० २।२।४) यस्मिन् विश्वे सर्वे देवा अधिनिषेदुः। प्रणवस्य सर्वमन्त्रात्मकत्वात्, मन्त्रेषु सर्वदेवतानां निवासात्—सर्वदेवनिवासत्वम्। ब्रह्माधिष्ठानत्वाद्वा ब्रह्मणि सर्वदेवानां निवासात् शिष्टम-विशिष्टम्—अस्यवामीय सूक्त में सायण द्वारा उद्धृत।

ऋचां अक्षरं परमे व्यवने। यस्मिन् देवाः अधिनिषण्णाः सर्वे यस्तन्न वेद किं स ऋचा करिष्यति। य इत्तद्विदुः। त इमे समासते इति विदुषः उपदि-शति। कतमत्तदेतदक्षरं ओमित्येषा वागिति शाकपूणिः। ऋचश्च ह्यक्षरे परमे व्यवने धीयन्ते नाना दैवतेषु च मन्त्रेषु।

यास्काचार्य (निरुक्त० १३ अ०)

१. वाचं देवा उपजीवन्ति विश्वे वाचं गन्धर्वा पशवो मनुष्याः। वाचीमा विश्वा भुवनान्यर्पिता सा नो हवं जुषतामिन्द्रपत्नी। वागक्षरं प्रथमजा ऋतस्य वेदानां माताऽमृतस्य नाभिः।

तै० ब्रा० २।८।८।५।

ऋग्वेद (१० मं०, सू० ११४, मं० ८) के इस मन्त्र में शक्ति और शक्तिमान् का स्पष्ट निर्देश मिलता है।

"प्रत्यग्रूपा पराकाशा"—(ललितासहस्रनाम २०० श्लोक) 'पराकाशो ब्रह्माभिव्यक्तिस्थानं तद्रूपा' (सौभाग्यभास्कर, पृ० १५७) आदि अनेक तान्त्रिक[1] प्रकरणों में परमव्योम की शक्ति रूप में प्रसिद्धि देखी जाती है। व्याकरण दर्शन तथा तन्त्र में जिस पश्यन्ती वाणी का महत्वपूर्ण उल्लेख मिलता है वह उनकी अपनी उपज नहीं है। शतपथब्राह्मण में यह पश्यन्ती[2] वाक् अपनी सम्पूर्ण गरिमा के साथ पहले से ही विद्यमान है। पूर्वमीमांसादर्शन, जो कि वैदिक कर्मकाण्ड की व्याख्या के लिए प्रसिद्ध है, वर्णवाद को मान्यता देता है; और यह वर्णनित्यतावादी परम्परा प्राचीनकाल से ही चली आ रही है, ऐसा जैमिनि के औत्पत्तिक १।१।५ सूत्रीय साबरभाष्यगत 'गकारौकार-विसर्जनीया इति भगवानुपवर्षः" से पूर्णतया स्पष्ट है। तन्त्र जहाँ वर्णों को विशेष महत्व देता है वहीं वह उनके बाह्य अस्थिमात्र और आन्तर-प्राणीय रूप को भी स्पष्ट करने में पीछे नहीं है। वैदिकसाहित्य के—

तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता
अन्योन्यसक्ता अनविप्रयुक्ताः।
क्रियासु बाह्याभ्यन्तरमध्यमासु
सम्यक्प्रयुक्तासु न कम्पते ज्ञः॥

प्रश्नोपनिषद्

'ओङ्कार की अकार, उकार और मकार ये तीनों मात्रायें संयुक्त अथवा पृथक्-पृथक् रूप में मृत्युमती हैं। हाँ, यदि उन्हें बाह्य, आभ्यन्तर और मध्यम क्रियाओं में अच्छी तरह प्रयुक्त किया जाय तो जानकार व्यक्ति विचलित नहीं होता।'

इस मन्त्र में भी तान्त्रिक मान्यता की पुष्टि की गयी है। मीमांसक वर्णों तक ही सीमित रहे किन्तु तान्त्रिकों ने वर्णों और सम्पूर्ण आहत नादों के अन्तराल में वर्तमान अखण्ड शब्दतत्व का भी निर्देश किया जो वैदिक मत का ही संवादी है।

---

१. यत्क्रियात्मशशिभानुमध्यगे खे चरत्यनलदृष्टिधाम्नि यः।
यत्तदूर्ध्वं शिखरं परं नभः तत्र दर्शय शिवं त्वमम्बिके॥

चिद्गगनच०, द्वितीय विमर्श ३२

२. सैषा त्रय्येव विद्या तपति। तद्धैतदविद्वांस आहुः—त्रयी वा एषा विद्या तपतीति। वाग्हैव तत्पश्यन्ती वदति।

शतपथब्रा० १०।५।४

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥

ऋ० ८।२।२३

कोई तो भूधर आदि विवर्त रूप में स्थित वाणी[1] को देखकर भी नहीं देखते—"मैं इन विवर्तों में वाणी का ही साक्षात्कार कर रहा हूँ"—ऐसा अनुसन्धान नहीं कर पाते । भ्रान्तिवश रज्जु में सर्प की तरह वस्तुतः शब्द का दर्शन करके भी फलतः उसे नहीं देखते । तथा कोई अन्य, पूर्व-पूर्व ध्वनियों से प्रभावित अव्यक्त ज्ञानजन्य वासना से सम्पन्न उत्तरोत्तर ध्वनियों द्वारा क्रमशः स्फुट, पद-वाक्य-महावाक्य आदि को अखण्ड रूप से सुन कर भी व्यञ्जक

इस प्रकार संक्षेप में वैदिक और तान्त्रिक मन्त्र और वाक्तत्त्व सम्बन्धी विचारों में साम्य का निर्देश किया गया।

वर्ण अथवा वर्णसङ्घ का मन्त्रत्व, उसमें निगूढ़ चेतना को उद्बुद्ध करने में ही है। जप और नाद या देवता के सतत अनुसन्धान से ही यह कार्य सम्भव हो पाता है। आचार्य अभिनवगुप्त ने कहा है—'जिस प्रकार निरन्तर रँहट के वाहन की क्रिया विचित्र यन्त्र के रूप में उदित होती है वैसे ही मन्त्रोदय विषयक एकानुसन्धान द्वारा, तादात्म्यापन्न होने के कारण मन्त्र-देवता भी प्रयत्नान्तर के बिना मङ्गलकारी बन जाता है—

यथारघट्टचक्राग्रघटीयन्त्रौघवाहनम् ॥ ३ ॥
एकानुसन्धियत्नेन चित्रं यन्त्रोदयं भजेत् ।
एकानुसन्धानबलाज्जाते मन्त्रोदयेऽनिशम् ॥ ४ ॥
तन्मन्त्रदेवतायत्नात्तादात्म्येन प्रसीदति ।

तन्त्रालोक, आ० ७

परिशिष्ट १

रहस्यमयी तान्त्रिक स्तुतियों का संग्रह

प्रकृतिस्तोत्रम्

प्रपञ्चसारतन्त्र एकादश पटल

प्रसीद प्रपञ्चस्वरूपे प्रधाने प्रकृत्यात्मिके प्राणिनां प्राणसंज्ञे ।
प्रणोतुं प्रभो प्रारभे प्राञ्जलिस्त्वां प्रकृत्याप्रतर्क्ये प्रकामप्रवृत्ते ।। ४९ ।।

स्तुतिर्वाक्यबद्धा पदात्मैव वाक्यं पदं त्वक्षरात्माक्षरं त्वं महेशि ।
ध्रुवं त्वां त्वमेवाक्षरैस्त्वन्मयैस्तोष्यसि त्वन्मयी वाक्प्रवृत्तिर्यतः स्यात् ।।

अजाधोक्षजत्रीक्षणाश्चापि रूपं परं नाभिजानन्ति मायामयं ते ।
स्तुवन्तीशि तां त्वाममी स्थूलरूपां तदेतावदम्बेह युक्तं ममापि ।। ५१ ।।

नमस्ते समस्तेशि बिन्दुस्वरूपे नमस्ते रवत्वेन तत्त्वाभिधाने ।
नमस्ते महत्त्वं प्रपन्ने प्रधाने नमस्ते त्वहङ्कारतत्त्वस्वरूपे ।। ५२ ।।

नमः शब्दरूपे नमो व्योमरूपे नमः स्पर्शरूपे नमो वायुरूपे ।
नमो रूपतेजोरसाम्भः स्वरूपे नमस्तेस्तु गन्धात्मिके भूस्वरूपे ।। ५३ ।।

नमः श्रोत्रचर्माक्षिजिह्वास्थनासास्यवाक्पाणिपत्पायुसोपस्थरूपे ।
मनोबुद्ध्यहङ्कारचित्तस्वरूपे विरूपे नमस्ते विभो विश्वरूपे ।। ५४ ।।

रवित्वेन भूत्वान्तरात्मा दधासि प्रजाश्चन्द्रमस्त्वेन पुष्णासि भूयः ।
दहस्यग्निमूर्तिर्वहन्त्याहुतिं वा महादेवि तेजस्त्रयं त्वत्त एव ।। ५५ ।।

चतुर्वक्त्रयुक्ता लसद्धंसवाहा रजसंश्रिता ब्रह्मसंज्ञां दधाना ।
जगत्सृष्टिकार्या जगन्मातृभूते परं त्वत्पदं ध्यायसीशि त्वमेव ।। ५६ ।।

विराजत्किरीटा लसच्चक्रशङ्खा वहन्ती च नारायणाख्यां जगत्सु ।
गुणं सत्त्वमास्थाय विश्वस्थितिं यः करोतीह सोंऽशोऽपि देवि त्वमेव ।।

जटाबद्धचन्द्राहिगङ्गा त्रिनेत्रा जगत्संहरन्ती च कल्पावसाने ।
तमः संश्रिता रुद्रसंज्ञां दधाना वहन्ती परश्वक्षमाले विभासि ।। ५८ ।।

सचिन्ताक्षमाला सुधाकुम्भलेखाधरा त्रीक्षणार्द्धेन्दुराजत्कपर्दा ।
सुशुक्लांशुकाकल्पदेहा सरस्वत्यपि त्वन्मयैवेशि वाचामधीशा ॥ ५९ ॥

लसच्छङ्खचक्रा चलत्खड्गभीमा नदत्सिंहवाहा ज्वलत्तुङ्गमौलिः ।
द्रवद्दैत्यवर्गा स्तुवत्सिद्धसङ्घा त्वमेवेशि दुर्गापि सर्गादिहीने ॥ ६० ॥

पुरारातिदेहार्धभागा भवानी गिरीन्द्रात्मजात्वेन यैषा विभाति ।
महायोगिवन्द्या महेशा सुनाथा महेश्यम्बिका तत्त्वतस्त्वन्मयैव ॥ ६१ ॥

लसत्कौस्तुभोद्भासिते व्योमनीले वसन्तीं च वक्षःस्थले कैटभारेः ।
जगद्वल्लभां सर्वलोकैकनाथां श्रियं तामहं देव्यहं त्वामवैमि ॥ ६२ ॥

अजाद्रीड्गुहाब्जाक्षपोत्रीन्द्रकाणाम् महाभैरवस्यापि चिह्नं वहन्त्यः ।
विभो मातरः सप्त तद्रूपरूपाः स्फुरन्त्यस्त्वदंशा महादेवि ताश्च ॥ ६३ ॥

समुद्यद्दिवाकृत्सहस्राभभासा सदा सन्तताशेषविश्वावकाशे ।
लसन्मौलिबद्धेन्दुलेखे सपाशाङ्कुशाभीत्यभीष्टात्तहस्ते नमस्ते ॥ ६४ ॥

प्रभाकीर्तिकान्ती दिवारात्रिसन्ध्याः क्रियाशा तमिस्रा क्षुधाबुद्धिमेधाः ।
धृतिर्वाङ्मतिः सन्नतिः श्रीश्च भक्तिस्त्वमेवेशि येऽन्ये च शक्तिप्रभेदाः ॥

देशिकेन्द्रेण दुर्वाससा विरचितं

श्रीत्रिपुरसुन्दरीमहिम्नस्तोत्रम्

[1]श्रीमातस्त्रिपुरे परात्परतरे देवि त्रिलोकीमहा-
सौन्दर्यार्णवमन्थनोद्भवसुधाप्राचुर्यवर्णोज्ज्वलम् ।
उद्यद्भानुसहस्रनूतनजपापुष्पप्रभं ते वपुः
स्वान्ते मे स्फुरतु [2]त्रिलोकनिलयं ज्योतिर्मयं वाङ्मयम् ॥ १ ॥

आदिक्षान्तसमस्तवर्णसुमणिप्रोते वितानप्रभे
ब्रह्मादिप्रतिमाभिकीलितषडाधाराब्जकक्षोन्नते ।
ब्रह्माण्डाब्जमहासने जननि ते मूर्तिं भजे चिन्मयीं
सौषुम्णायतपीतपङ्कजमहामध्यत्रिकोणस्थिताम् ॥ २ ॥

वन्दे वाग्भवमैन्दवात्मसदृशं वेदादिविद्यागिरो
भाषा देशसमुद्भवाः पशुगताश्छन्दांसि सप्त स्वरान् ।
तालान्पञ्च महाध्वनीन्प्रकटयत्यात्मप्रसारेण[3] यत्-
तद्बीजं पदवाक्यमानजनकं श्रीमातृके ते परम् ॥ ३ ॥

त्रैलोक्यस्फुटमन्त्रतन्त्रमहिमा स्वात्मोक्तिरूपं विना
यद्बीजं व्यवहारजालमखिलं नास्त्येव मातस्तव ।
तज्जाप्यस्मरणप्रसक्त[4]सुमतिः सर्वज्ञतां प्राप्य कः
शब्दब्रह्मनिवासभूतवदनो नेन्द्रा[5]दिभिः स्पर्द्धते ॥ ४ ॥

---

१. काशी संस्कृत सीरीज, सङ्ख्या २१ में प्रकाशित पुष्पदन्तकृत महिम्न-स्तोत्र (१६२४ ई०) के साथ मुद्रित इसी स्तोत्र के प्रारम्भ में निम्नाङ्कित अतिरिक्त श्लोक मिलता है :—

मातस्ते महिमां वक्तुं शिवेनापि न शक्यते ।
भक्त्याहं स्तोतुमिच्छामि प्रसीद मम सर्वदा ॥ १ ॥

३ और ४ के मध्य में भी एक श्लोक अधिक है :—

या बालेन्दुदिवाकराक्षिमधुरा या रक्तपद्मासना
रत्नाकल्पविराजिताङ्गलतिका पूर्णेन्दुवक्त्रोज्ज्वला ।
अक्षस्रक्सृणिपाशपुस्तककरा या बालभानुप्रभा
तां देवीं त्रिपुरां शिवां हृदि भजेऽभीष्टार्थसिद्ध्यै सदा ॥

२. पाठान्तर–त्रिकोण । ३. प्रकाशेन । ४. प्रसक्ति । ५. सेन्द्रा ।

मात्रा यात्र विराजतेऽतिविशदा तामष्टधा मातृकां
शक्तिं कुण्डलिनीं चतुर्विधतनुं यस्तत्त्वविन्मन्यते ।
सोऽविद्याखिलजन्मकर्मदुरितारण्यं प्रबोधाग्निना
भस्मीकृत्य विकल्पजालमखिलं मातः पदं तद्व्रजेत् ॥ ५ ॥

तत्ते[1] मध्यमबीजमम्ब कलयाम्यादित्यवर्णं क्रिया-
ज्ञानेच्छादिसमस्त[2]शक्तिविभवव्यक्तिं व्यनक्ति स्फुटम् ।
उत्पत्तिस्थितिकल्पकल्पिततनु स्वात्मप्रसारेण यत्
काम्यं ब्रह्महरीश्वरादिविबुधैः कामं क्रियायोजितैः ॥ ६ ॥

कामान्कारणतां गतानगणितान्कार्यैरनन्तै[3]र्मही-
मुख्यैः सर्वमनोगतानधिगतान्मानैरनेकैः स्फुटम् ।
कामक्रोधसुलोभमोहमदमात्सर्यारिषट्कं च यद्
बीजं [4]भ्राजयतिप्रणौमि तदहं ते साधु कामेश्वरि ॥ ७ ॥

यद्भक्ताखिलकामपूरणचण[5]स्वात्मप्रभावं महा-
जाड्यध्वान्तनिवारणैकतरणिज्योतिः प्रबोधप्रदम् ।
यद्वेदेषु च गीयते श्रुतिमुखं मात्रात्रयेणोमिति
श्रीविद्ये तव सर्वराजवशकृत्तत्कामराजं भजे ॥ ८ ॥

यत्ते देवि तृतीयबीजमनलज्वालावलीसन्निभं
सर्वाधारतुरीय-[6]बीजमपरं ब्रह्माभिधाशब्दितम् ।
मूर्द्धन्यान्तविसर्गभूषितमहौकारा[7]त्मकं तत्परं
[8]संविद्रूपमनन्यतुल्यमहिम[9]स्वान्ते मम द्योतताम् ॥ ९ ॥

सर्वं सर्वत एव सर्गसमये कार्येन्द्रियाण्यन्तरा
तत्तद्दिव्यहृषीककर्मभिरियं संव्यश्नुवाना परा ।
वागर्थव्यवहारकारणतनुः शक्तिर्जगद्व्यापिनी[10]
यद्बीजात्मकतां गता तव शिवे तन्नौमि बीजं परम् ॥ १० ॥

अग्नीन्दुद्युमणिप्रभञ्जनधरानीरान्तरस्यायिनी
शक्तिब्रह्महरीशवासवमुखामर्त्यासुरात्मस्थिता ।

---

१. यत्ते । २. ज्ञानेच्छादिमनन्त । ३. अनेकैः । राजति सम्प्रणौमि तदहं ते कामराजाभिधम् । ५. पूर्णचरण । ६. शक्तिपरमब्रह्माभिधाशब्दितम् । ७. महोकारा । ८. सच्चिद्रूप । ९. भ्राजद्रूपमनन्यतुल्यमभितः । १०. जगद्रूपिणी ।

सृष्ट[1]स्थावरजङ्गमस्थितमहाचैतन्यरूपा च या
यद्बीजस्मरणेन सैव भवती प्रादुर्भवत्यम्बिके ॥ ११ ॥

स्वात्मश्रीविजिताजविष्णुमघवश्रीपूरणैकव्रतं
[2]यद्विद्याकविताविताललहरीकल्लोलिनीदीपकम् ।
बीजं यत्त्रिगुणप्रवृत्तिजनकं ब्रह्मे ति यद्योगिनः
शान्ताः सत्यमुपासते तदिह ते चित्ते दधे श्रीपरे ॥ १२ ॥

एकैकं तव मातृके परतरं संयोगि वा योगि वा
विद्यादिप्रकटप्रभावजनकं जाड्यान्धकारापहम् ।
यन्निष्ठाश्च महोत्पलासनमहाविष्णुप्रहर्त्रादयो
देवाः स्वेषु विधिष्वनन्य[3]महिमस्फूर्तिं दधत्येव तत् ॥ १३ ॥

इत्थं त्रीण्यपि मूलवाग्भवमहाश्रीकामराजस्फुर-
च्छक्त्याख्यानि चतुःश्रुतिप्रकटितान्युत्कृष्टकूटानि ते ।
भूतर्तुश्रुतिसङ्ख्यवर्णविदितान्यारक्तकान्ते शिवे
यो जानाति स एव सर्वजगतां सृष्टिस्थितिध्वंसकृत् ॥ १४ ॥

[4]नित्यं यस्तव मातृकाक्षरसखीं सौभाग्यविद्यां जपेत्
सम्पूज्याखिलचक्रराजनिलयां सायन्तनाग्निप्रभाम् ।
कामाख्यं शिवनामतत्त्वमुभयं व्याप्यात्मना सर्वतो
दीव्यन्तीमिह तस्य सिद्धिरचिरात्स्यात्त्वत्स्वरूपैकता ॥ १५ ॥

काव्यैः पापठितैः किम[5]प्यविदुषां जोघुष्यमाणैः पुनः
किं तैर्व्याकरणैर्विबोधिततया किं वाभिधानश्रिया ।
एतैरम्ब न बोभवीति सुकविस्तावत्तव श्रीमतो
र्यावन्नानुसरीसरीति सरणिं पादाब्जयोः पावनीम् ॥ १६ ॥

---

१. सृष्टिः । २. सद्विद्याकविताविलास । ३. ष्वनन्त ।

४. 'काशी संस्कृत सीरीज' के संस्करण में १५वें श्लोक से पहले यह अति-रिक्त श्लोक मिलता है :—

ब्रह्मायोनिरमासुरेश्वरसुहृल्लेखाभिरुक्तैस्तथा
मार्तण्डेन्दुमनोजहंसवसुधामायाभिरुत्तंसितैः ।
सोमाम्बुक्षितिशक्तिभिः प्रकटितैर्बाणाङ्गवेदैः क्रमाद्-
वर्णैः श्रीशिवदेशिकेन विदितां विद्यां तवाम्बाश्रये ॥

५. मल्प ।

गेहं नाकति गर्वितः प्रणतति स्त्रीसङ्गमो मोक्षति
द्वेषी मित्रति पातकं सुकृतति क्ष्माबल्लभो दासति ।
मृत्युर्वैद्यति दूषणं सुगुणति त्वत्पादसंसेवनात्
त्वां वन्दे भवभीतिभञ्जनकरीं गौरीं गिरीशप्रियाम् ।। १७ ।।

आद्यैरग्निरवीन्दुबिम्बनिलयैरम्ब त्रिलिङ्गात्मभि-
र्मिश्रा रक्तसितप्रभैरनुपमैर्युष्मत्पदैस्तैस्त्रिभिः ।
स्वात्मोत्पादितकाललोकनिगमावस्थामरादित्रयै-
रुद्भूतं त्रिपुरेति नाम कलयेद्यस्ते स धन्यो बुधः ।। १८ ।।

आद्यो जाप्यतमार्थवाचकतया रूढः स्वरः पञ्चमः
सर्वोत्कृष्टतमार्थवाचकतया वर्णः पवर्गान्तकः ।
वक्तृत्वेन महाविभूतिसरणिस्त्वाधारगो हृद्गतो
भ्रूमध्यस्थित इत्यतः प्रणवता ते गीयतेऽम्बागमैः ।। १९ ।।

गायत्री सशिरा तुरीयसहिता सन्ध्यामयीत्यागमै-
राख्याता त्रिपुरे त्वमेव महतां शर्मप्रदा कर्मणाम् ।
तत्तद्दर्शनमुख्यशक्तिरपि च त्वं ब्रह्मकर्मेश्वरी
कर्तार्हन्पुरुषो हरिश्च सविता बुद्धः शिवस्त्वं गुरुः ।। २० ।।

अन्नप्राणमनःप्रबोधपरमानन्दैः शिरःपक्षयु-
क्पुच्छात्मप्रकटैर्महोपनिषदां वाग्भिः प्रसिद्धीकृतैः ।
कोशैः पञ्चभिरेभिरम्ब भवतीमेतत्प्रलीनामिति
ज्योतिःप्रज्वलदुज्ज्वलात्मचपलां यो वेद स ब्रह्मवित् ।। २१ ।।

सच्चित्तत्त्वमसीतिवाक्य[1]विदितैरध्यात्मविद्याशिव-
ब्रह्माख्यैरतुलप्रभावसहितैस्तत्त्वैस्त्रिभिः सद्गुरोः ।
तद्रूपस्य मुखारविन्दविवरात्सम्प्राप्य दीक्षामतो
यस्त्वां विन्दति तत्त्वतस्तदहमित्यार्ये स मुक्तो भवेत् ।। २२ ।।

सिद्धान्तैर्बहुभिः प्रमाणगणितै[2]रन्यैरविद्यातमो-
नक्षत्रैरिव सर्वमन्धतमसं तावन्न निर्भिद्यते ।
यावत्ते सवितेव सम्मत[3]मिदं नोदेति विश्वान्तरे
जन्तोर्जन्मविमोचनैक[4]भिदुरं श्रीशाम्भवं[5]श्रीशिवे ।। २३ ।।

---

१. विततै । २. गदितैः । ३. सन्मत । ४. निवारणैक । ५. श्रीशाम्भवि ।

आत्माऽसौ सकलेन्द्रियाश्रयमनोबुद्ध्यादिभिः शोचितः
कर्मबद्धतनुर्जनिं च मरणं प्राप्नोति[1] यत्कारणम् ।
तत्ते देवि महाविलासलहरीदिव्यायुधानां जय-
स्तस्मात्सद्[2]गुरुमभ्युपेत्य कलयेत्त्वामेव चेन्मुच्यते ।। २४ ।।

नानायोनिसहस्रसम्भववशाज्जाता जनन्यः कति
प्रख्याता जनकाः कियन्त इति मे सेत्स्यन्ति चाग्रे कति ।
एतेषां गणनैव नास्ति महतः संसार[3]सिन्धोर्विधे-
र्भीतं मां नितरामनन्यशरणं रक्षानुकम्पानिधे ।। २५ ।।

देहक्षोभकरैर्व्रतैर्बहुविधैर्दानैश्च होमैर्जपैः
सध्यानै[4]र्हयमेधमुख्यसुमखैर्नानाविधैः कर्मभिः ।
यत्सङ्कल्पविकल्पजाल[5]मलिनं प्राप्यं[6] पदं तस्य ते
दूरादेव निवर्तते परतरं मातः पदं निर्मलम् ।। २६ ।।

पञ्चाशन्निजदेहजाक्षरमयै[7]र्नानाविधैर्धातुभि-
र्बह्वर्थैः पदवाक्यमानजनकैरर्थाविना[8]भावितैः ।
साभिप्रायवदर्थ[9]कर्मफलदैः ख्यातैरनन्तैरिदं
विश्वं व्याप्य चिदात्मनाहमहमित्युज्जृम्भसे मातृके ।। २७ ।।

श्रीचक्रं श्रुतिमूलकोश इति ते संसारचक्रात्मकं
विख्यातं तदधिष्ठिताक्षरशिवज्योतिर्मयं सर्वतः ।
एतन्मन्त्रमयात्मिकाभिररुणं[10] श्रीसुन्दरीभिर्वृतं
मध्ये बैन्दवसिंहपीठललिते त्वं ब्रह्मविद्या शिवे ।। २८ ।।

बिन्दुप्राणविसर्गजीवसहितं बिन्दुत्रिबीजात्मकं
षट्कूटानि विपर्ययेण निगदेत्तारत्रिबालाक्षरैः[11] ।
एभिः सम्पुटितं प्रजप्य विहरेत्प्रासादमन्त्रं परं
गुह्याद् गुह्यतमं सयोगजनितं सद्भोगमोक्षप्रदम् ।। २९ ।।

आताम्रार्कसहस्रदीप्तिपरमा सौन्दर्यसारैरलं
लोकातीतमहोदयैरुपयुता[12] सर्वोपमागोचरैः ।
नानानर्घ्यविभूषणैरगणितै[13]र्जाज्वल्यमानाभितः[14]
[15]श्रीमातस्त्रिपुरारिसुन्दरि कुरु स्वान्ते निवासं मम ।।३०।।

---

१. प्रतीति । २. त्वां । ३. सिन्धूर्मिभिः । ४. सन्तानैः । ५. भाव । ६. ख्यातं । ७. भवै । ८. रथं । ९. चिदर्थ । १०. रभितः । ११. वलैः । १२. रवयवैः । १३. रुपगतैः । १४. तिमकैः । १५. त्वं ।

शिञ्जन्नूपुरपादकङ्कणमहामुद्रासुलाक्षारसा-
लङ्काराङ्कितमङ्घ्रिपङ्कजयुगं श्रीपादुकालङ्कृतम् ।
उद्भास्वन्नखचन्द्रखण्डरुचिरं राजज्जपासन्निभं[1]
ब्रह्मादित्रिदशासुरार्चित[2]महं मूर्ध्नि स्मराम्यम्बिके ॥ ३१ ॥

आरक्तच्छविनातिमार्दवयुजा निश्वासहार्येण सत्[3]
कौशेयेन विचित्ररत्नखचितैर्मुक्ताफलैरुज्ज्वलैः ।
कूजत्काञ्चनकिङ्किणीभिरभितः सन्नद्धकाञ्चीगुणै-
रादीप्तं सुनितम्बबिम्बमरुणं ते पूजयाम्यम्बिके ॥ ३२ ॥

कस्तूरीघनसारकुङ्कुमरजोगन्धोत्कटैश्चन्दनै-
रालिप्तं मणिमालयातिरुचिरं गैवेयहारादिभिः ।
दीप्तं दिव्यविभूषणै[4]र्जननि ते ज्योतिर्विभास्वत्कुच-
व्याजस्वर्णघटद्वयं हरिहरब्रह्मादिपीतं भजे ॥ ३३ ॥

मुक्तारत्नविचित्रकान्तिललितैस्ते बाहुवल्लीरहं
केयूराङ्गद[5]बाहुदण्डवलयैर्हस्ताङ्गुलीभूषणैः ।
सम्पृक्ताः कलयामि हीरमणिमन्मुक्तावलीकीलित-
ग्रीवापट्टविभूषणेन सुभगं कण्ठं च कम्बुश्रियम् ॥ ३४ ॥

उद्यत्पूर्णकलानिधिश्रिवदनं भक्तप्रसन्नं सदा
सम्फुल्लाम्बुजपत्रकान्ति[6]सुषमाधिक्कारदक्षेक्षणम् ।
सानन्दं कृतमन्दहासमसकृत्प्रादुर्भवत्कौतुकं
कुन्दाकारसुदन्तपङ्क्तिशशिभापूर्णं स्मराम्यम्बिके ॥ ३५ ॥

तप्तस्वर्णकृतोरुकुण्डलयुगं माणिक्यमुक्तोल्लस-
द्धीराबद्धमनन्यतुल्यमपरं हैमं च चक्रद्वयम् ।
शुक्राकारनिकारदक्षममलं मुक्ताफलं सुन्दरं
विभ्रत्कर्णयुगं भजामि ललितं नासाग्रभागं शिवे ॥ ३६ ॥

शृङ्गारादिरसालयं त्रिभुवनीमाल्यैरतुल्यैर्युतं
सर्वाङ्गीणसदङ्गरागसुरभि श्रीमद्वपुर्धूपितम् ।
ताम्बूलारुणपल्लवाधरयुतं रम्यं त्रिपुण्ड्रं दधद्-
भालं नन्दनचन्दनेन जननि ध्यायामि ते मङ्गलम् ॥ ३७ ॥

---

१. भासुरं । २. भिपूजित । ३. यत् । ४. रगणितैः । ५. रोत्तम् । ६. चित्र ।

जातीचम्पककुन्दकेशररजोगन्धोद्गिरत्केतकी-
नीपाशोकशिरीषमुख्यकुसुमैः प्रोत्तंसिता धूपिता ।
आनीलाञ्जनतुल्यमत्तमधुपश्रेणीव वेणी तव
श्रीमातः श्रयतां मदीयहृदयाम्भोजं सरोजालये ।। ३८ ।।

लेखालभ्यविचित्ररत्नघटितं हैमं किरीटोत्तमं
मुक्ताकाञ्चनकिङ्किणीगणमहाहीरप्रबन्धोज्ज्वलम् ।
चञ्चच्चन्द्रकलाकलापललितं देवद्रुपुष्पार्चितं
माल्यैरम्ब विलम्बितं सुशिखरं बिभ्रच्छिरस्ते भजे ।। ३९ ।।

उत्क्षिप्तोच्चसुवर्णदण्डकलितं पूर्णेन्दुबिम्बाकृति-
च्छत्रं मौक्तिकचित्ररत्नखचितं क्षौमांशुकोत्तंसितम् ।
मुक्ताजालविलम्बितं सकलशं नानाप्रसूनाङ्कितं
चन्द्रोड्डामरचामराणि दधते श्रीदेवि ते स्वःस्त्रियः ।।४०।।

विद्यामन्त्ररहस्यविन्मुनिगणैः क्लृप्तोपचारार्चनां
वेदादिस्तुतिगीयमानचरितां वेदान्ततत्त्वात्मिकाम् ।
सर्वास्ताः खलु तुर्यतामुपगतास्त्वद्रश्मिदेव्यः परा-
स्त्वां नित्यं समुपासते स्वविभवैः श्रीचक्रनाथे शिवे ।। ४१ ।।

एवं यः स्मरति प्रबुद्धसुमतिः श्रीमत्स्वरूपं परं
वृद्धोऽप्याशु युवा भवत्यनुपमः स्त्रीणामनङ्गायते ।
सोष्टैश्वर्यतिरस्कृताखिलसुरश्रीजृम्भणैकालयः
पृथ्वीपालकिरीटकोटिवलभीपुष्पार्चिताङ्घ्रिर्भवेत् ।। ४२ ।।

अथ तव धनुः पुण्ड्रेक्षुत्वात्प्रसिद्धमतिद्युति
त्रिभुवनवधूमुद्यज्ज्योत्स्नाकलानिधिमण्डलम् ।
सकलजननि स्मारं स्मारं गतः स्मरतां नर-
स्त्रिभुवनवधूमोहाम्भोधेः प्रपूर्णविधुर्भवेत् ।। ४३ ।।

प्रसूनशरपञ्चकप्रकटजृम्भणागुम्फित-
त्रिलोकमवलोकयत्यमलचेतसा चञ्चलम् ।
अशेषरमणी[1]जनस्मरविजृम्भणे यः सदा
पटुर्भवति ते शिवे त्रिजगदङ्गनाक्षोभणे ।। ४४ ।।

---

१. तरुणी ।

पाशं प्रपूरितमहासुमतिप्रकाशो
यो वा तव त्रिपुरसुन्दरि सुन्दरीणाम् ।
आकर्षणेऽखिलवशीकरणे प्रवीणं
चित्ते दधाति स जगत्त्रयवश्यकृत्स्यात् ।। ४५ ।।

यः स्वान्ते कलयति कोविदस्त्रिलोक[1]-
स्तम्भारम्भचणमत्युदारवीर्यम् ।
मातस्ते विजयमहाङ्कुशं सरोषान्
देवान्स्तम्भयति च भूभुजोऽन्य[2]सैन्यम् ।। ४६ ।।

चापध्यानवशाद्भवोद्भवमहामोहस्य व्युज्जृम्भणं
प्रख्यातं प्रसवेषुचिन्तनवशात्तच्छरव्यं सुधीः ।
पाशध्यानवशात्समस्तजगतां मृत्योर्वशत्वं महा-
दुर्गस्तम्भमहाङ्कुशस्य मननान्मायाममेयां तरेत् ।। ४७ ।।

न्यासं कृत्वा गणेशग्रहभगणमहायोगिनीराशिपीठैः
पञ्चाशन्मातृकार्णैः सहितबहुकलैरष्टवाग्देवताभिः ।
सश्रीकण्ठादियुग्मैर्निजविमलतनौ केशवाद्यैश्च तत्त्वैः
षट्त्रिंशद्भिर्धराद्यैर्भगवति भवतीं यः स्मरेत्स त्वमेव ।।४८।।

सुरपतिपुरलक्ष्मीजृम्भणातीतलक्ष्मीः
प्रसरति निजगेहे यस्य दैवं त्वमार्ये ।
विविधबहुकलानां पात्रभूतस्य तस्य
त्रिभुवनविदिता सा जृम्भते स्फूर्ति[3]रच्छा ।। ४९ ।।

[4]मातस्त्वं भूर्भुवःस्वर्महरसि नृतपःसत्यलोकैश्च सूर्ये-
न्द्वारज्ञाचार्यशुक्रार्किभिरपि निगमब्रह्मभिः प्रोतशक्तिः ।
प्राणायामादियानैः कलयसि सकलं मानसं ध्यानयोगं
येषां तेषां सपर्या भवति सुरकृता ब्रह्मता योगिता च ।। ५० ।।

क्व मे बुद्धिर्वाचा परमविदुषो मन्दसरणिः
क्व ते मातर्ब्रह्मप्रमुखविदुषामाप्तवचसाम् ।
अभून्मे विस्फूर्तिः परतरमहिम्नस्तव नुतिः
प्रसीद क्षन्तव्यं बहुलतरचापल्यमिह मे ।। ५१ ।।

---

१. त्रिलोकी । २. भूभुजौघ । ३. कीर्ति ।
४. यह श्लोक कुछ पाठ-भेद के साथ परशम्भुमहिम्नस्तव में भी मिलता है ।

देशिकेन्द्रेण दुर्वाससा कृतः

परशम्भुमहिम्नः स्तवः

प्रथमं प्रकरणम्

अनेकशक्तिसङ्घट्टप्रकाशलहरीतनुः ।
शुद्धसंविच्छिवः पायाद्विभुः श्रीपरमेश्वरः ।।

श्रीशम्भो ते महिम्नः स्तुतिपथरचिताः साङ्गवेदाः सशास्त्राः
सिद्धान्ताः साङ्गविद्याः सचकितमतयो नैव पश्यन्ति पारम् ।
साद्यन्तास्त्वामनन्तं परमशिवगुरुं ते कथं वर्णयेयु-
स्तस्मात्प्रज्ञानुसारादहमपि भवतः स्तौमि किञ्चिच्चरित्रम्।।१।।

पिण्डे षाट्कौशिकेऽस्मिन्नवविवरपुरे पञ्चभूतेन्द्रियाढ्ये
पुंस्के स्त्रैणे च षाण्डे शिवगुरुवचनैरत्र विज्ञायसे चेत् ।
केनाप्यन्नासुचित्तप्रमितिनिरुपमानन्दकोशान्तराशि-
स्त्वं षोढा भिन्नमूर्तिः परशिव स बुधो विश्वरूपत्वमीयात्।।७।।

सर्वेश श्रीपुरेश त्रिभुवनभवनव्यक्तयः शक्तयस्ते-
ऽनन्ताद्याः श्रीपराद्या निरवधिविभवा मातृकान्ताः क्षकान्ताः ।
विज्ञाताः स्युः स्वरूपे यदि शिवगुरुणा विश्वदृश्यप्रपञ्च
स्वात्मज्योतिर्विलीनान्विदधति विदुषो योगिनः सैव मुक्तिः ।।

या षोढा पञ्चधा च प्रकटितविभवा श्रीपरा देव शम्भो
सैव श्रीसुन्दरीति श्रुतिभिरभिनुता चक्रराजासनस्था ।
सर्वत्रानेककोटिप्रकटितगणनायोगिनीर्व्यश्नुवाना
त्वत्तेजोऽन्तर्निरूढा रचयति जगतामादिमध्यान्तकालान् ।।

या शक्तिः पञ्चवाहप्रवहणलहरीव्यक्तनैजात्मतेजः
संवर्ताग्निप्रपीतत्रिभुवनजलधिः कालसङ्कर्षणी ते ।
दिक्कालातीतमूर्ते परशिवमहतां भक्तिभाजामविद्यां
मृत्युं विज्ञानदानात्प्रहरति विदुषां तन्महत्त्वं त्वमेव ।। १० ।।

सर्वज्ञो नित्यतृप्तः सदसदुभयगोऽनादिबोधः स्वतन्त्रो
नित्यालुप्तात्मशक्तिर्निरुपमचरितोऽनन्त इत्यङ्गषट्कैः ।
षट्शक्तिव्यक्तभावस्त्वमिह यदि शिव ज्ञायसे देशिकोक्त्या
येन स्वात्मन्यनादौ सकलविलसितं ते परायाः स भेदः ।।

गायत्री वेदधात्री शतमखफलदा वेदशास्त्रैकवेद्या
चिच्छक्तिं ब्रह्मविद्यां परमशिव तव श्रीपरां व्याकरोति ।
शब्दब्रह्मैक्यवाच्यामखिलमतमिति व्यक्ततत्त्वामवाच्यां
सप्तस्रोतोविभूतिं त्रिभुवनमयतां तत्त्वतः सर्वतुर्याम् ।।१२।।

संसारासारभारप्रवहणचतुरामादिशक्तिं परां तां
स्वात्माभिन्नां विदित्वा वपुरनुमतिभिर्नावृताहङ्कृतिस्थः ।
त्रैलोक्यं ब्रह्मविश्वप्रसरमनवधिस्वप्रकाशप्रपूर्णं
[illegible]

स्वप्रत्यक्षं विहाय स्वरहितमिति चेदस्ति नान्यत्र तत्त्वं
ये धीरास्तर्कयेयुस्त इह जनिमृतीराप्नुवन्त्यङ्गभारैः ॥१४॥

न ब्रह्मा विष्णुरुद्रौ सुरपतिरमरा नासुरा नैव पृथ्वी
नापोऽग्निर्नैव वायुर्नच गगनतलं नो दिशो नैव कालः ।
नो वेदा नैव यज्ञा न च रविशशिनौ नो वियन्नो विकल्पः
स्वज्योतिः सत्यमेकं जयति तव पदं सच्चिदानन्तमूर्ते ॥१५॥

शम्भो सैद्धान्तिका ये स्वमतिविभवतोऽखर्वगर्वाः प्रमाणै-
र्मीमांसन्ते भवन्तं बहुमतजनकैरावृता शुद्धविद्यैः ।
अन्योऽन्यस्पर्द्धिनस्ते कथमिह भवतस्तत्त्वमीयुः स्वतेजः
सर्वातीतं विकल्पग्रहरहितमजं मानतर्काद्यगम्यम् ॥ १६ ॥

धीराः केचिन्महान्तो गुरुवचनरतास्त्यक्तसंसारभावा
निःशङ्काघोरविद्याः परिणतमतयः सर्वसङ्कल्पमुक्ताः ।
त्वत्कारुण्याक्षिलक्ष्याः परमशिव भवत्साधकाः पुण्यपापैः
कृत्याकृत्यैर्विहीनाः परपदविभवं त्वां प्रपश्यन्ति विश्वम् ॥१७॥

सिद्धान्तः शाम्भवोऽयं शिवगुरुवचनाघोरविद्याक्षरोक्तः
स्तोत्रव्याजेन निर्वाह्यत इति भवतः श्रीविभो चापलं मे ।
अत्र न्यूनातिरेकोक्तिजनितमसकृत्क्षम्यतां दासबुद्धया
मच्चित्तस्थः प्रमेयं समुपदिश परं मातृकावर्णराशिम् ॥१८॥

इति उपोद्घातप्रकरणं प्रथमम् ।

द्वितीयं प्रकरणम्

श्रीमद्रश्मिप्रभावं त्रिभुवनभवनव्यञ्जकस्वात्मदीपं
को वा वक्तुं निरुक्त्या प्रभवति यतधीरात्तसम्यग्विमर्शः ।
यत्र ब्रह्मादिविद्वन्मतिरपि विगतिर्याति भीत्या विनाशं
श्रुत्या सार्द्धं स केन प्रविततमतिना वर्ण्यते ते महेश ॥ १ ॥

षण्णामप्यन्वयानां क्षितिजलदहनस्पर्शनाकाशचेतः
पीठस्थानां पराद्याः परशिवभवतः शक्तयो मातृकान्ताः ।
ब्रह्मादिप्रेतसिंहासनगतविभवैस्तावकीयैः षडङ्गै-
र्द्वात्रिंशद्रश्मिमुख्याः स्वकिरणकरणव्याप्तविश्वैर्विभान्ति ॥२॥

बुद्धेः सम्यग्विमर्शप्रकटितसरणेरर्थवद्वाक्प्रवृत्ते-
यंत्र स्थाने तुरीये नवकलितमहावाक्यतत्त्वे विनाशः ।
तत्किं ज्योतिस्तमो वा सदसदुभयगं किं न्वमूर्तं नु मूर्तं
निर्धारश्चेद्विनाशो नहि मतिवचसां देव तस्मात्परस्त्वम् ॥३॥

ज्ञानं योगः प्रकाशो विधिरुभयमतिर्देहधीः प्राणशून्या-
हङ्कारश्चाधिकामः स्वविषयमनघं चाश्रयन्नन्तरास्ते ।
इत्यात्माकाशसत्ता तव परिविदिता सम्यगेतत्प्रमेया-
धारेष्वन्तर्धृतं यत्पयसि तिलचये तैलवद्भासि हीश ॥ ४ ॥

षट्त्रिंशत्तत्त्वपुष्पस्तबकपरिमलस्तावकीयः स तेजः-
कल्पद्रुश्चेत्प्रबुद्धः शिवगुरुवचसा सर्वतः स्वानुभूतः ।
अद्वैतब्रह्मबुद्धिं जनयति विदुषामेष एवास्मदादि-
ब्रह्मान्तात्मप्रपञ्चे विलसति न परोऽस्तीति चेत्पारिजातः ।५॥

स्वप्रत्यक्षेऽपि तत्त्वे करतलफलवद्वेत्ति नासौ स्वरूपं
नाना सिद्धान्तजालप्रलपितजनिताज्ञानमोहान्धकारैः ।
आक्रान्तः पुण्यपापैरधिगतनिधनैरात्मकर्मण्यनादौ
हेयोपादेयबुद्ध्या भव इति विहितस्ते महामाययेश ॥ ६ ॥

एकोऽसौ लक्षणैश्चेदखिलतनुगतैरिन्द्रियार्थैरनेकै-
र्भिन्नः स्वात्मप्रकृत्या विधिजनिमृतिभिः सन्निबद्धः किमेतत् ।
देवत्वं मानुषत्वं वपुषि भुजगतां सर्वजीवात्मकत्वं
धत्से शैलूषवत्ते स्मरति न तु पदं श्रीमहादेवमूर्ते ॥ ७ ॥

इति पराशक्तिस्कन्धरश्मिप्रकरणं द्वितीयम् ।

तृतीयं प्रकरणम्

सत्त्वं चित्त्वं महत्त्वं तव परमगुरोरात्मशक्तेः परायाः
पिण्डीकृत्य प्रकृत्य प्रथमरतिपतिव्याजकालान्तवह्निः ।
भूत्वा संसारसृष्टिस्थितिलयनिलयाद्याति तोयार्णवान्तं
तन्वानो निर्ममेच्छस्त्वमिह विजयसे विष्णुमायाविभूते ॥१॥

मायायामन्तरस्थः कुसुमसररसस्तावकीयः स्वकाले ।
ज्ञानज्ञेयप्रमातृप्रकटितमहिमा स्वप्ररोहप्रसारैः ।

उत्पाद्याद्यं विरिञ्चं तदनु भुवनतामात्मना व्यश्नुवानो
बीजाकारः स्वयम्भूरिति कथयति ते नाम विश्वात्मसृष्टेः॥२॥

आदिक्षान्तार्णसृष्टिं त्रिभुवनभवनाभासभूमिं शिवादि-
क्षित्यन्तात्मीयतत्त्वावलिविकृतगतिं वेधसाण्डान्तभूमिम् ।
आत्मीयानुत्तरेच्छागुणपरवशतां प्राप्य संव्यश्नुवानः
श्रीशम्भो विश्वसृष्टिर्भवसि निजमलत्रय्युपप्रोषितात्मा ॥३॥

चत्वारः कालतत्त्वे तव युगपतयस्ते च धातुश्च पुत्रा
व्याख्याता द्वादशैते स्थितिकृतिविदिताः सावताराः सदाराः ।
श्रीकण्ठाद्याश्च नाथा धृतयुगविधयस्त्वन्नियत्युत्थितान्ता-
श्चैतन्या एव तस्मात्स्थितिरिति विदितस्त्वं सहस्रार्कदीप्ते॥४॥

आत्मीयानादिरश्मीनिह भवजनितानेकसिद्धान्तजाल-
व्यामोहोद्यद्विकल्पानृतनिजविषयान्पुण्यपापादिभेदैः ।
दुर्ज्ञेयान्देशिकोक्त्या प्रविमलवपुषि स्वप्रकाशैकवह्नौ
स्वात्मत्वेन प्रबुद्धाञ्झटिति विजयते यस्त्वदात्माविरोधः ॥

जाग्रत्स्वप्नप्रसुप्तिप्रकटितविभवैरात्ममायागुणैः स्वै-
र्ज्ञानेच्छाक्रोधरूपैर्विधिहरिहरकैरावृते मोक्षमार्गे ।

चतुर्थं प्रकरणम्

संवेद्यं तत्त्वजालं परशिवधरणीमूलपारं विचित्रं
कर्मानन्तप्रपञ्चं निरुपममहिमानादिमध्यावसानः।
ब्रह्मानन्दामृताब्धिः समरसविधुना जृम्भितस्वात्मभासो
हेतुत्वेन प्रबोधज्वलन तव महाज्ञानशक्ति व्यनक्ति ॥ १ ॥

गोजं क्षीरं यथैकं द्युतिविविधगुणस्वेन्द्रियार्थप्रकाशोऽ-
प्येकस्तद्वर्णनानारुचिरधिकरणस्यैकताकारणेन।
नीलाद्याभासबुद्धचा नभसि परिवृतो धूमभासैरिवाग्निः
प्राचुर्येण प्रदीप्तः परमशिव ततः सत्यविश्वात्मकस्त्वम् ॥२॥

नित्याखण्डप्रकाशादमलतरविभो त्वत्सकाशात्कदाचि-
न्माया सञ्जायमाना त्रिगुणमुखगणव्यक्तशक्तिस्वभावा।
सिद्धान्तैर्भिन्नमानप्रमितिभिरसुखैर्भेदबुद्धिप्रधानैः
संसारित्वं प्रसार्य द्रढयति भवतः सत्यतां वेदविद्या ॥ ३ ॥

अन्यः पक्षोऽथवात्र प्रविमलकलनानन्तशक्तिप्रकाशः
सत्याख्यः सोऽपि यत्र प्रविलयमयते शून्यगर्ते तदात्मा।
यौष्माकः सत्यभावः स च निजमहसां कामरूपात्ममाया-
मुत्पाद्यैतत्प्रपञ्चं घटयति तदिदं व्यश्नुषे स्वात्मयोने ॥ ४ ॥

ऐक्याच्चिद्ह्लादयोश्चेदिदमहमिति च द्वन्द्वभावस्य जीव-
ब्रह्मादिद्वैतबुद्धचोर्दिनकरशशिनोरण्डविध्यण्डयोश्च।
प्राणापानाख्यवाय्वोः सुकृतदुरितयोः स्याद्यदा सामरस्य-
प्रादुर्भावस्तदा त्वं भवसि सदसदानन्दनाथः परोऽग्रे ॥ ५ ॥

सेयं विज्ञानशक्तिस्तव शिवगुरुणा दर्शिता नित्यशुद्धा
निर्द्वन्द्वब्रह्मतत्त्वं गमयति सुधियां सच्चिदानन्दपूर्णम्।
लोके मेयप्रमातृप्रमितिभिरिति चेदर्थिता भिन्नमार्गाः
मुद्रा नाना स्वरूपाः प्रकटयति मुदाहङ्कृतिस्थाः परेश ॥६॥

इति ज्ञानशक्तिस्कन्धरश्मिप्रकरणं चतुर्थम्।

पञ्चमं प्रकरणम्

बुद्धिज्ञानेन्द्रियाणां निजनिजविषयास्वादभोगप्रबोध-
क्षीराब्धिः प्रोद्यदिच्छामृतकरणरुचा वाङ्मुखक्षालितैश्च ।
सङ्क्रान्तश्चालितार्थप्रसरबहुपथः स्वात्ममायोरुपूर-
त्रुटचद्ब्रह्माण्डबिन्दून्विकिरति तव चेत्त्वं शिवातः क्रियात्मा ॥

सृष्टिस्थित्यन्तलीलावकलितसरणिर्यत्प्रयत्नो यदीयं
धैर्यं विख्यातवीर्यं सकलमिति गता यस्य बुद्धिः समृद्धा ।
यत्सामर्थ्यं प्रभूतं निरवधिगणनाजाण्डरुद्राण्डभाण्डा-
गारं यद्ब्रह्मसत्ता जयति तव मनोरूपविश्वात्मकत्वम् ॥ २ ॥

संवेशं दूरदेशं कलयति सकलं कर्मकृत्यं च तत्त्वं
स्वं यद्बाह्येन्द्रियाणां चलनमपि विना स्वान्तमन्तःप्रकाशम् ।
तत्ते वीर स्वतन्त्रप्रकृतिनिगमनं निर्गतोपाधितर्कं
बाह्याख्यादर्शनार्थं विमलशिव ततस्त्वं हृषीकाश्रयात्मा ॥३॥

यद्वन्न्यग्रोधबीजं पृथुतरविटपानोकहत्वेन रूढं
सामर्थ्यं दर्शयेस्त्वं परमशिव सदा सत्यविज्ञानबीजम् ।
इच्छाक्षेत्रे सुबुद्धीन्द्रियकुलकलितं सर्वतः स्वक्रियाभिः
स्वात्मानं विश्वरूपं प्रकटयसि यदा त्वं तदा गोचरः स्याः ॥४॥

स्वात्माशेषाक्षवृत्तेः पृथगयनतया क्वापि भूतानि पञ्च
क्वापि प्रेक्षाप्रपञ्चः क्व च निनदमुखाः क्वापि वाक्यादयश्च ।
एतैरेव प्रवृत्तो निजविषयतया सर्वविश्वात्मजृम्भ-
स्तस्मात्त्वं लोकमुख्योऽद्वयमिति रहितः स्वप्रकाशप्रमेयः ॥५॥

कालावस्थाश्च तिस्रो गिरिश दश दिशः सप्तधा भूमिरापो
नाना तेजः समीरा दश वियदखिलव्यापि चैकादशाक्षाः ।
भिन्नार्थानन्यबोधप्रकटितमहिमा बीजभेदास्त्वनन्ता-
स्त्वत्सक्ता बीजजाताः स्वगुणमनुसरन्त्येव ते देव सत्त्वात् ॥६॥

पञ्चाशद्वर्णमाला बहुविधनिनदोच्चारणात्तत्त्वजाल-
व्यक्तिव्यापारसक्ता गिरिश गुरुमुखाम्नायविद्यास्वरूपा ।
धात्राद्युत्पत्तिपूर्वं श्रुतिमुखविविधानेकसिद्धान्तविद्या
नानाभाषाक्रियाभिः प्रकटयति ततः सैव ते साङ्गवेदान् ॥७॥

वर्णेभ्यो धातवः स्युर्विविधपदचयस्तद्भवस्तेन वाक्यं
तस्माज्जातं प्रमाणं विविधनिगमनं तेन सिद्धान्तजालम् ।
तस्मान्नानात्मतत्त्वप्रकटनमिति यत्तत्त्वविद्या त्वदीया
त्वं चेदेकोऽद्वितीयः क्रमरहितमहासंविदात्मा महेशः ॥ ८ ॥

यज्ञस्थानं श्मशानं सकलमिति गृहं भास्वदोङ्कारपीठं
प्रादुर्भूतप्रयाणस्थलमिति विपुलं कल्पवृक्षाधिरूढैः ।
संवीतैर्भैरवैश्चोरगपतिगणपैस्तत्र दिव्यार्घ्यपात्रं
वह्निबद्धेतदकल्पं परशिव सकलं [illegible] स्वात्मना त्वम् ॥९॥

तत्तच्चक्रप्रभेदोद्भवविविधमहाशब्दरूपामनन्त-
ब्रह्मानन्दप्रवाहामनुभवसि परामादिसौषुम्णमूर्ते ॥ २ ॥

यस्मात्प्राणः प्ररोहत्युपरिगतिरधः सम्प्रधावत्यपान-
स्तस्मादेवाविरोधात्तदुभयजनिकृद्वायुसंरोधमात्रात् ।
विद्याविद्यादियुग्मप्रसरसमरसाम्बोधिजृम्भैरदम्भैः
सार्द्धं हंसः परस्मिन् महसि खलु लयं प्रैति ते प्राणसूत्रः ॥३॥

सर्वेषामिन्द्रियाणां निजनिजविषयोद्योतनं यत्प्रसूतं
साराः सर्वेषु कर्मस्वनुपमविषयाः साध्वसानन्दकोपाः ।
यज्जाताः सर्वनाडीपथचलदनिलव्याप्तयः सर्वभावाः
नानारूपाश्च सर्वायनपथिकमहास्पन्दकः स त्वमेव ॥ ४ ॥

बुद्ध्वा सद्देशिकोक्त्या सुविदितविभवां खेचरीं दिव्यमुद्रा-
मर्थानन्तप्रपञ्चान्वितनिजकरणान्यात्मचित्ते निरुद्धय ।
तच्चित्तं ज्योतिरङ्गं निरवधिकरणं चिन्येद्यः स योगी
निर्वाणः कृष्णवर्त्मा भवति तव महास्पन्दतामेत्य शम्भो ॥

प्राणाख्या कुण्डलिन्या जगदिदमखिलं प्राणितं ते ययेश
ज्ञात्वा यां योगिनस्ते परतरमभयं यान्ति शान्तं पदं तत् ।
यामज्ञात्वा भवाब्धौ जननमरणकृत्क्रूरकर्मप्रबद्धा
मज्जन्त्याद्यन्तहीना यदि कृपयति सा मोचयेन्मृत्युबन्धात् ॥

इति कुण्डलिनीशक्तिस्कन्धरश्मिप्रकरणं षष्ठम् ।

सप्तमं प्रकरणम्

अज्ञातं ब्रह्मतत्त्वं निजहृदयदरीलीनमात्मप्रकाशं
व्यक्तीकर्तुं स्वनित्याक्षरविदितमहामातृकात्वं प्रपन्नः ।
त्वं दिव्याम्नायविद्यासुविदितमहिमानन्तशक्तिप्रकाश-
स्तत्तद्वर्णात्मभेदैरुपदिशसि पदं श्रीगुरो स्वस्वरूपम् ॥ १ ॥

श्रीशब्दब्रह्ममूर्ते सकलरवमयानाहतध्वानभेदा-
नात्मीयानक्षरस्थान्बहुविधनिनदैर्भूरिवाद्यप्रभेदैः ।
भेरीनिःसाणघण्टादरमुरजमहाशृङ्गनालोरुतालै-
र्वंशैर्यन्त्रैश्च गात्रैर्जलधरपटलैस्त्वं ब्रवीषि ध्वनिज्ञः ॥ २ ॥

तत्त्वानां व्यक्तिहेतुः सकलतिथिगतः सुप्रपूर्यष्टकाङ्ग-
स्त्रीपुंसद्वन्द्वरूपो द्युमणिशशिमहावह्निपादः षडात्मा ।
सर्वाभिप्रायसंवित्प्रकटितविभवस्त्वं महाम्नायविद्या-
सारस्फारस्वरूपः पुरुष इति ततः सोऽक्षरात्मादिवर्णः ॥३॥

रम्योदात्तानुदात्तस्वरितविकृतिगः प्रोच्चनीचोभयस्थो
भेदादष्टादशात्मा महितनिजमहास्फूर्तिरेकोऽक्षरादिः ।
षड्जादिग्रामजातश्रुतिविततलसद्गीतसप्तस्वरोद्य-
न्नानारागान्प्रबन्धानधिवसति भवानादिनित्यस्वरात्मन् ॥४॥

सर्वास्यस्थानवर्णः प्रथमविगणितस्त्वं स्तुतः षोडशीति
स्वेच्छाशक्त्या निरूढद्रढिमनिजमहाप्रौढिमाढौकमानः ।
कालव्यक्तस्त्रिलिङ्गिन्निजगतिविलयान्ह्रस्वदीर्घप्लुतादीन्
विद्याविद्योभयात्मा जनयसि परितः श्रीमहावर्णजात्मन् ॥५॥

पक्षद्वन्द्वैककर्तावनिजलहुतभुङ्मारुताकाशमूर्ते
श्रोत्राद्यक्षाणि सर्वाण्यधिगतचरणः स्वप्रकृत्या निबद्धः ।
अन्तःस्थो विश्वरूपः पुरुष इति यतो ज्ञायसे स्वक्रमेण
ज्ञाता वर्गाक्षराणां परमशिव जनैस्त्वं ततो वर्गजोऽसि ॥६॥

सर्वातीतात्मधामानलनिलयपदज्ञापिका मन्त्रविद्याः
सत्याभिप्रायबुद्ध्या शिवगुरुवदनाम्भोरुहाद् भासमानाः ।
नानार्था धातवश्च प्रकटितविभवाश्चित्रवाग्ब्रह्मवेदाः
सर्वं नश्यद्विना त्वां परशिवसहजं वर्णसंयोगरूपम् ॥ ७ ॥

ओङ्कारं स्वात्मवासं श्रुतिभिरभिनुतं वाग्भवं शक्तिबीजं
माबीजं स्मारबीजं परतरविभवं मातृकाबीजयुग्मम् ।
शैवान्त्यं चापि गत्वा षडयनविलसत्कूटषट्कं च भित्वा
हंसः सोऽहं तथा त्वं विरमसि मनसामन्तरे मन्त्रमूर्ते ॥ ८ ॥

विन्द्वेन्दोरूर्ध्वनादैरवकलितकलाव्याप्तिभिः साधिदेवै-
र्नानानन्ताधिदेवैः परिणतिसुलभैः श्रीगुरूक्तागमस्थैः ।
न्यासैर्विद्याविशेषैः श्रुतिसुखविविधानेकसिद्धान्तमन्त्रैः
विष्वक्प्रोतप्रतीको दहसि भवमघं दुष्प्रभामन्त्रवह्नौ ॥ ९ ॥

वर्णास्ते मन्त्रविद्या दशविकरणगा धातवो नित्यशब्दाः

नाना च्छन्दांसि तालाः स्वरविकृतिगुणाः सर्वतो वाङ्मयस्थाः
नानारूपाः परान्गेः समजनिषत ते मातृकाशक्तिबीजात् ॥१०॥

इति मातृकाशक्तिस्कन्धरश्मिप्रकरणं सप्तमम् ।

अष्टमं प्रकरणम्

एवं रात्रिन्दिवस्थाः परशिवघटिका एव ते रश्मिभूताः
स्त्रीपुंसद्वन्द्वरूपा रविशशिचरणाक्रान्तयो रक्तशुक्लाः ।
षट्छक्त्यंशप्रभेदा दहरपुरयुगे कोणषट्कान्तरस्थाः
कालावस्थाश्चतुर्भिः प्रविदधति युगैर्विश्वभूतैर्निदानैः ॥ १ ॥

षट्त्रिंशत्तत्त्वमालामवनिमुखशिवान्तामुपेतात्मवृत्ति
खे वायौ सप्तविंशत्युडुगणविकृतीर्जीवमाया शिवांशात् ।
तेजस्थाः स्वान्तरात्मान्तरतनुविकृतीरस्थिमांसप्रमुख्याः
क्षोण्यां त्वं जीवमायागुणगणमभितो भासयस्यंशुमालिन् ॥२॥

यावन्तस्ते मयूखाः क्षितिजलदहनस्पर्शनाकाशचेतः-
पीठस्थाः षट्प्रमाणाः परमधिपतयो भैरवा एव सर्वे ।
तेषां मध्ये त्वमेकः परतरमहिमोज्ज्जृम्भमाणः प्रचण्डो
मार्तण्डो रश्मिमध्यस्थित इव परितो भासि चिद्भैरवाग्ने ॥३॥

भैरव्यो रश्मिदेव्यस्तव शिव करुणापूरिताक्षाः प्रसन्ना-
स्त्वत्सत्ताकाशवाहोदितनिजगतयश्चविलात्मार्थकृत्याः ।
तद्धामन्येव शान्ताः सुरमुनिपितृभिः पुण्यपापैश्च बद्धान्
भक्ताँश्चानेकबाधाञ्झटिति विघटयन्त्यात्मबोधाग्निजृम्भैः ॥४॥

श्रीनाथ श्रीपरेश्वर परशिव ते दिव्यदिव्या मरीची-
र्ब्रह्मादीनां मनोवागनवगतमहाचित्रनानार्थरूढाः ।
गूढप्रौढप्रकाशाः सुरमुनिवचनैरप्यबुद्धाः कथं वा
स्तोतुं ज्ञातुं समर्थो भवति कविजनः कोऽत्र मन्दो नृमात्रः ॥५॥

इति श्रीषडन्वयरश्मिविवेकस्कन्धप्रकरणमष्टमम् ।

नवमं प्रकरणम्

साङ्गा भूमिः शताङ्गः शतधृतिरपि तत्सारथिः सप्तयस्ते
वेदा ब्रह्मैकवेद्याः पृथुतरचरणौ पुष्पवन्तौ तदक्षः ।
मेरुस्तत्कीलबन्धः कमठपतिरिभास्तत्पृथुस्तम्भपङ्क्तिः,
शेषस्तद्रज्जुबन्धस्तदुपरि पितृभूस्तत्र चिन्त्यो रथी त्वम् ॥१॥

कल्पान्तानन्तसूर्यद्युतिमति विकटानेकदंष्ट्रं षडास्यं
वह्नीन्द्वर्काम्बुकाष्ठादशयुतमभितः प्रज्वलन्तं मयूखैः ।
शूलासीषूग्रशक्त्यङ्कुशवरनृशिरः श्रीफलेष्वासनारि-
द्योतत्पाशाभयाङ्कैर्निजभुजपरिघैस्त्वां गुरुं शम्भुमीडे ॥२॥

नागास्थीन्दुप्रसूतैः श्रवणगतमहाभूषणैः कुण्डलीन्द्रै-
राक्रोशन्मुण्डमालापरिवृतवपुषा दिक्षु जाज्वल्यमानम् ।
मत्तेभेन्द्रोरुकृत्यन्तरघटितकटीमण्डलं साट्टहासं
तं भास्वद्व्योमगर्भोदरविधृतकराङ्गुष्ठमात्रं प्रपद्ये ॥ ३ ॥

नागेन्द्रैः कल्पवृक्षैरधिगतविहगैर्भैरवैर्देवदैत्यैः
भूतैः प्रेतैः पिशाचैः परिवृतमभितो योगिनीभिः श्मशाने ।
सर्वप्रज्ञैकवासं त्रिभुवननिलयं स्वात्मनाध्यात्मदीप्तं
सर्वोत्तीर्णात्मतत्त्वेश्वरमनलमुखं त्वां गुरुं शम्भुमीडे ॥ ४ ॥

नाना ध्यानात्मयोगप्रकटितशिवतासिद्धरूपप्रसादः
स्वेच्छाज्ञानक्रियात्मत्रिशिखविदलितत्र्युदीर्णप्रमोहः ।
सत्यज्ञानासिभिन्नप्रमितिजनिरिपुः स्वात्मयोगेषु धारा-
[illegible] ॥५॥

एवं ते दिव्यदिव्यायुधपरमहिमा गीयते वेदशास्त्रैः
प्रागुक्तस्ते शताङ्गोऽप्यपि च पितृगणप्रेतशीर्षोच्चरङ्गे ।
उच्चण्डं ताण्डवं ते त्रिभुवनभयकृद्वज्रपाताट्टहासो
भीषास्मात्त्वत्सकाशादपर इव परो नास्ति तेनोग्रवीरः ॥८॥

चित्ताकाशानिलाग्न्यम्ब्ववनितलपतिप्रेतसिंहासनस्थः
षट्छक्तिव्यक्तमूर्तिः षडयनपथिकः सोमसूर्याग्निपादः ।
ब्रह्माग्निः सप्तजिह्वाकवलितविषयीभूतविश्वप्रपञ्च
स्थूलोऽपि ध्यानदृष्टेस्त्वमधिकतमसां ज्योतिषामप्यगम्यः ॥९॥

इत्युक्तध्यानचिन्त्योऽप्यनवगतमनोवाक्प्रवृत्तिस्वभावः
स्वच्छन्दात्मीयसत्ता चिदुचितविभवः पावकः शम्भुरूपः ।
सर्वातीतस्वभावोऽप्युपनिषदुदितज्ञानमीमांस्यमानः
सत्त्वं यस्यान्तरङ्गे निवसति स शिवस्त्वन्मयः स्यान्महेश ॥१०॥

श्रीमानप्यादिभिक्षुस्त्रिभुवनजनकोऽप्यात्मभूरागमोक्ति-
व्याख्यावेद्योऽप्यवाचः प्रकृतिसुविमलोऽप्यात्ममायाविलासः ।
तत्त्वादेकोऽप्यनेकः परयुवतिरतोऽप्यात्मवित्सेव्यमानः
तस्मात्स्वच्छन्दलीलस्त्वमिह विजयसे मानसीं भाववृत्तिम् ॥

इति श्रीपावकध्यानयोगप्रकरणं नवमम् ।

दशमं प्रकरणम्

द्रष्टव्यस्त्वं जगद्भिर्बहुविधविधिभिः सर्वसिद्धान्तवाक्यैः
श्रोतव्यो निर्विकल्पः शिवगुरुवदनाम्भोरुहेण प्रबुद्धः ।
मन्तव्यः सर्वतत्त्वावकलितचरणस्तन्निदिध्यासितव्यः
सत्तामात्रावलम्बीत्यमरनुतपदो नास्ति देवस्त्वदन्यः ॥ १ ॥

उग्रं शान्तं च वीरं सकलमयमहाविष्णुमग्निं ज्वलन्तं
सर्वत्रानन्तवक्त्रं नरमृगवपुषं भीषणं सर्वभद्रम् ।
सर्वज्ञं मृत्युमृत्युं वहुविधनुतिभिर्वन्दितं सर्वलोकैः
विश्वाहङ्कारजृम्भं परमशिवगुरुं त्वां भजे मन्त्रराजम् ॥२॥

शम्भो त्वां भूर्भुवःस्वर्महरुदिततनुं त्वन्तरिक्षद्युसूर्या-
रज्ञाचार्येन्दुशुक्रार्किभिरपि निगमब्रह्मभिः प्रोतशक्तिम् ।

प्राणापानादिभेदैः कलयति सकलं मानसं ध्यानयोगं
येषां तेषां सपर्या भवति सुरकृतब्रह्मता योगिता च ॥ ३ ॥

सर्वोत्कृष्टं परं तत्सवितुरनुपमं ते वरेण्यं शरण्यं
भर्गो देवस्य धीमह्यभिदधति धियो यो न इत्यौर्वतेजः ।
तुर्यं सर्वाणि भूतान्यधिगतममलं सर्वतो दृक्क्रमाद्यं
ध्यायामि ध्येयमन्तःकरणसुनियतैर्योगिभिः श्रीमहेश ॥ ४ ॥

कालोऽनन्तो युगात्मा शिव दिवसनिशापक्षमासास्तथाब्दाः
तद्भेदाः षड्ऋतुस्थास्तदनुगतजगत्सर्ववृत्तान्तभेदाः ।
दानायज्ञक्रियाश्च त्रिदशदितिसुता मानुषाः सर्वनागाः
योगीन्द्रा जीवसङ्घास्तव चरणबिलं यान्ति जन्मान्तमध्यात् ॥५॥

भूतं भव्यं भविष्यत्त्रिभुवनभवने षण्महाशक्तिभिस्त्वं
तत्सर्वं व्यश्नुवानो विचरसि कलितः सृष्टिगत्यन्तकामैः ।
देवैर्दैत्यैर्मनुष्यैरुरगपतिकुलैः सर्वजीवप्रसारै-
रत्मीयैश्चित्रिताङ्गः शिव भवतमसः सूर्यभास्त्वं परस्तात्॥६॥

श्रोता स्पर्शी च द्रष्टा निजरसरसिकः सर्वगन्धान्तरज्ञो
वक्ता कर्ता च गन्ता त्रिभुवनभवतो विश्वसर्गः प्रमोदी ।
कामी मीमांसकश्च प्रथितशुचिशिखासप्तकव्याप्तविश्वो
बोद्धा स्वार्थाननन्तानधिगतचरणः सर्वतस्त्वं शिवोऽसि ॥७॥

सर्वार्थी सर्वनामा सकलकुलपतिः सर्वलोकाङ्गनेशः
शृङ्गारी सर्वभोगी नवरसरसिकः प्राज्यसाम्राज्यभोक्ता ।
त्रैलोक्ये वाक्प्रपञ्चे प्रवचनपठितः सोमयाजी च यज्ञः
संसारी कामचारीत्यनुवदति जनो यः स धन्यः शिव त्वाम् ॥

क्षेत्रं क्षेत्रप्रमाता शिवगुरुवदनाघोरविद्याधिदेवो
मन्त्रो मन्त्राधिदेवो मखविधिरनघो योगयोग्यः पदार्थः ।
त्वं दर्शः पूर्णमासः परिधिरपि मखाचार्यवर्यश्च होतो-
द्गाताध्वर्युश्च हव्यं त्रिविधहुतवहस्त्वां विना नास्ति शम्भो ॥

क्षेत्रज्ञाः सर्वदेवाः सुरनरभुजगाः सर्वजीवाश्च तच्च
क्षेत्रं ब्रह्माण्डरूपं त्रिभुवनभवनव्यापकं चित्ररूपम् ।
एतावद्व्याप्य तत्र स्थितमखिलजगद्भक्तभोक्तारमग्निं
ज्ञात्वा षट्छक्तिभिस्त्वां परमशिव महामृत्युमत्येति विद्वान् ॥

उक्तक्षेत्राधिदेवे परतरपुरुषे त्वय्यनन्तस्वरूपे
दिव्याम्नाया गुरूक्ता निजनिजनियतिस्फूर्तयः सर्ववेदाः ।
साङ्गोपाङ्गाश्च शास्त्राण्यधिगतमहिमान्योऽन्यसिद्धान्तविद्या
भाषा स्वार्थैर्विभान्ति त्रिणयन भवतो विश्वमूर्तेः परः कः ॥

मूलं व्योमैव वायुज्वलनजलधरा मध्यमं यस्य शाखा
देवाः पर्णानि दैत्याः किसलयनिचया मानुषाश्च प्रतानाः ।
नागाः पुष्पाणि जीवा बहुविधतनवो पक्वसस्यप्रबोधो
विश्वन्यग्रोधकद्रोः परमशिव भवान् बीजभूतो विभाति ॥१२॥

मायारूपेण कालो जननमरणकृन्सर्वजीवाङ्गवृत्ते-
र्विद्यारूपेण कालान्तक इति विनुतः स त्वमेवापरो न ।
देहाहङ्कार एवान्तक इति गुरुणा यः प्रविज्ञाय मायां
जागर्त्यात्मप्रबोधे शिव तव कृपया सोऽत्र मृत्युञ्जयः स्यात् ॥

त्वं नाथस्त्वं गुरुस्त्वं परपदजनिताम्नायविद्यार्थकोश-
स्त्वं शम्भुस्त्वं परेशः परतरमहिमा त्वं परा त्वं पराग्निः ।
त्वं भानुस्त्वं सुधांशुस्त्वमपि च जननी त्वं पिता त्वं सुमित्र-
स्त्वंभ्राता बान्धवस्त्वं त्वमसि धननिधिस्त्वां विना नास्ति मेऽन्यः

शब्दार्थाधारभूतं त्रिभुवनजनकं सर्वतो दिक्सतत्त्वं
त्रैलोक्यस्थायि लिङ्गत्रयविदितपदं सर्वतत्त्वैकवेद्यम् ।
सर्वानिर्वाच्यसत्तागतपरविभवज्योतिरुज्जृम्भमाणं
व्यक्तीकृत्यात्मवर्णैः प्रकटयसि परं तत्त्वमात्मीयमग्रे ॥१५॥

त्वे विश्वं विश्वहेतुर्विरहितकरणे विश्वकार्यैककर्ता
विश्वातीतश्च विश्वेश्वर इति बहुधा निश्चितश्चाक्षरज्ञैः ।
अद्वैतात्मप्रबोधानलबहुलशिखार्चितात्मीयहव्यः
श्रीशम्भो विश्वसत्ता परतरवियति प्रैषि निर्वाणपूजाम् ॥१६॥

एवं यः स्तौति मूर्तिं त्रिभुवनमहतीं विष्वगाश्चर्यचर्या-
मन्तर्बाह्यागमोक्तिप्रविनुतविभवामादिमध्यान्तहीनाम् ।
सौम्योग्राकारदेवासुरनरभुजगानेकजीवप्रभेदो-
त्पत्तिस्थित्यन्तभूमिः स भवति जगदाश्चर्यवानेव शम्भो ॥१७॥

इति महाविभूतिप्रकरणं दशमम् ।

एकादशं प्रकरणम्

का पूजा पूजकः कः शिवगुरुरिति कः को विधिः कश्च मन्त्रः
किं पीठं किं प्रसूनं किममलसलिलं केऽत्र सर्वोपचाराः ।
निर्द्वन्द्वस्यात्मनस्ते द्वयमिति रचितं सर्वमेतत्कथं स्या-
त्सन्तोषार्थे महेश त्रिकरणविमलज्ञानपूजाप्रसन्नाः ॥ १ ॥

त्रैकाल्यं सर्वतस्ते सकलजगदिदं व्यश्नुवानात्मसत्ता-
विस्फूर्तेरष्टमूर्तेरखिलजनमनःप्रोच्चसिंहासनस्य ।
कस्मादावाहनं स्याद्बहिरिह चरितं क्वासनं चन्द्रमौले-
र्माया संसारभावो रचयति नितरामात्मभोगाय भेदम् ॥२॥

आधारोऽग्निः सुपात्रं रविरमृतकलानायकः पूर्णमर्घ्यं
शक्तीशस्त्वं प्रपूज्यः षडवयवयुतस्तत्र पात्रप्रवर्गे ।
पाद्यं ते तर्पणं च प्रभवति समुदे बाह्ययागार्घ्यपात्रैः
सन्तुष्टः स्याः कथं त्वं परशिवविमलज्ञानदुग्धाब्धिशायिन् ॥३॥

भास्वच्चन्द्राग्निबिम्बोदितविमलशिवज्ञाननित्यप्रमोद-
ज्ञानानन्दप्रवाहस्त्रिगुणितसरितो मुख्यनाडीत्रयस्थाः ।
कालिन्दीजह्नुकन्यान्तरसरिदभिधास्ते तनुस्नानकृत्ये
सृष्टा हृल्लिङ्गमूर्तेः कथमितरजलैः स्यात्तव स्नानमत्र ॥४॥

लज्जारागादिमायातिमिरदिनकरीभूतचेतः प्रबोध-
ज्योतिः पुञ्जप्रवृत्तेर्गतभवतमसो दिक्पटालङ्कृतस्य ।
प्रज्ञायज्ञोपवीतैरुपचितवपुषः प्रेतभस्माङ्गराग-
स्यान्ये मिथ्योपचारास्तव वसनमहासूत्रबन्धानुलेपाः ॥ ५ ॥

सर्वाहिंसेन्द्रियाश्वद्रुतगतिशमनं सर्वभूतानुकम्पा-
शान्तिः सत्यं प्रबोधो गुरुकथिततपो निश्चलध्यानदृष्टिः ।
श्रद्धा भक्तिश्च नित्यं निजविषयपरित्यागिता निःस्पृहत्वं
संवित्पूज्येति पुष्पाण्यमल शिव भवत्पूजनाय क्रियन्ते ॥ ६ ॥

ब्राह्म्याद्या मातरोऽष्टौ स्वविषयकुसुमैरात्मभावप्रसूनैः
योगिन्यः शक्तयस्ते निजनिजमहिमस्फूर्तिसन्मञ्जरीभिः ।
त्वद्भावं भावयद्भिस्तव किरणमहाभैरवैरात्तसङ्गा-
स्त्वां श्रीचिद्भैरवेशं परमशिवगुरुं पूजयन्ति स्मरन्त्यः ॥७॥

सद्विद्याङ्गारमध्यार्पितसततमहावासनाभ्यासधूपैः
श्रीमद्वक्त्रारविन्दोदितसकलकुलाम्नायबोधप्रदीपैः ।
सर्वाक्षार्थान्न भेदैरुपरचितमहादिव्यनैवेद्यपानै-
राराध्यो योगिभिस्त्वं कथमितरकृतैस्तोष्यसे श्रीपरेश ।।८।।

इत्यन्तर्यागोपचारपरामर्शप्रकरणमेकादशम् ।

द्वादशं प्रकरणम्

विद्या नाना विभूषा मृगमदघनसारादिसौरभ्यवस्तु-
प्रोतश्रीचन्दनानि प्रविकचकुसुमान्यद्भुतान्यम्बराणि ।
नानामोदाश्च धूपाः क्रमुकशकलवद्वीटिकाः पानभेदाः
नानापात्राणि भूम्याः परशिव भवतः पूजनाय क्रियन्ते ।।१।।

सप्तैते मण्डलस्थाश्चरुजलनिधयो दिव्यनैवेद्यराशी-
न्नाना पक्वान्नभेदान्विविधपिशितवच्छाकनानोपदेशान् ।
भक्ष्यं भोज्यं च चोष्यं विविधशशिसुधास्वादवद्वस्तु लेह्यं
हालादध्याज्यदुग्धान्यपि विदधति ते सूपहाराय शम्भो ।।२।।

मन्त्राकारैः प्रदीपैर्दहनरविकलानाथनक्षत्रमाला-
विद्युन्माणिक्यमुक्तारजतकनकधात्वादिनानाप्रकाशैः ।
युष्मन्नीराजनायै विरचितरचनः स्वप्रकाशादिमूर्ति
सर्वानन्दात्मरूपं परमशिवगुरुं भासयत्यौर्वतेजः ।। ३ ।।

मुद्रा नानार्थपोषानतिपथचलितानष्टयोगाँश्च नाट्यं
तीर्थाक्रान्तिं प्रणामं निजकरणगतिं सर्वसिद्धान्तवाचः ।
कर्माज्ञानप्रवाहान्व्यजनमपि महाचामराण्यातपत्रं
हस्त्यश्वादीन् रथाँस्ते परेशिवचरणाध्यास्य दास्यं विधत्ते ।।

आकाशः शब्दभेदैः प्रलयजलधरामन्ददम्भोलिजृम्भै-
र्भेरीनिःसाणवाद्यैर्दरनिकररवैर्भूरिघण्टानिनादैः ।
तालैर्नादैर्मृदङ्गैर्मुरजडमरुकैर्गीतसद्वल्लकीभिः
सर्वैर्वाद्यप्रभेदध्वनिभिरिह विभो नाथ पूजां करोति ।। ५ ।।

शम्भव्यो रश्मिदेव्यः समरसमुदिता मातृकावर्णरूपा
भास्वन्तो भैरवाष्टावपि सरसकलापानमत्ताः क्रमस्थाः ।

वेदान्तैरागमान्तैरभिदधति वरं शाम्भवं वैभवं ते
सर्वानिर्वाच्यसत्तावियदुदितपदं श्रीविभो विश्वमूर्ते ॥ ६ ॥

योगिन्यः क्षेत्रपालाः सरसमधुमदा वेदशास्त्रार्थतत्त्व-
व्याख्यानध्यानवक्त्राः पितृवनदशदिग्वृक्षगा भैरवाश्च ।
सौधास्वादप्रमत्ताः प्रकटितविकटाटोपसिंहाट्टहासाः
स्वस्वव्यापारपुष्पैः परमशिवगुरुं त्वां विभो पूजयन्ति ॥ ७ ॥

भूताः प्रेताः पिशाचाः स्वविकृतिविभवैः प्राप्तवीभत्सवेषा
योगिन्यस्ते श्मशानावरणगतमहादेवता भासयन्ति ।
देवास्ते पूर्वदेवा मधुरसमुदिता विस्मयाविष्टचित्ताः
शान्ता ध्यायन्ति गायन्त्यपि परमशिव त्वां मुदोपासते च ॥८॥

ब्रह्मा वेदोक्तिगानैर्हरिरपि कमलैस्ताण्डवैश्चण्डरुद्रा-
स्तौर्यत्रय्या महेन्द्रो निजनिजविषयैरन्यदिक्पालदेवाः ।
सिद्धाः सर्वे मुनीन्द्रा स्तुतिनतिवचनैः सर्वदुर्गागणेशा
नृत्तैर्वाद्यप्रभेदैर्विदधति सुमुदं ते महादेव शम्भो ॥ ९ ॥

सन्तप्तः प्रेतसिंहासनविहितमहाभैरवः शाम्भवाग्निः
पञ्चाशद्विस्फुलिङ्गाक्षरविदितपराघोरविद्योग्रतेजाः ।
सत्यान्तर्यज्ञदेवस्त्रिभुवनहविषा तोषितात्मीयरश्मि-
र्वागर्थव्यक्तभावात्सकलमिह तनुं व्यश्नुवानो विभाति ॥१०॥

सर्वज्ञानैकभूमिस्त्रिभुवनकरवीराख्यशून्यश्मशान-
ज्ञानाकूपारपूरश्रुतमुखबहुविच्छास्त्रबोधोदवाहान् ।
प्रज्ञां गाम्भीर्यगर्वाद्ग्रसति रविरिव स्वप्रकाशात्प्रकाशा-
नन्यानिन्दूडुमुख्यान्निविडतररुचिर्ध्वान्तपूरांस्तवाग्निः ॥ ११ ॥

श्रीशम्भो विश्वमूर्ते परमशिव गुरो नाथ विश्वेश्वरात्म-
न्नेषाशेषार्थवद्वाक्प्रसवविरचिता स्रग्धरावृत्तपूजा ।
त्वय्येव ज्ञानवह्नौ हुतवहरसने संहृता मुक्तये मे
भूयादागः क्षमस्व प्रवचनपठितः श्रीविभो मे प्रसीद ॥१२॥

इति विशेषोपचारपरामर्शे शान्तिप्रकरणं द्वादशम् ।

त्रयोदशं प्रकरणम्

इति तव कृपादोग्ध्री पूजा सुभक्तिस्रुतामृता
जननमरणप्रादुर्भावप्रभेदपटीयसी ।
जनयति मुदं ब्रह्मानन्दप्रवाहतरङ्गिणीं
दहति विपदः पुण्यं पापं दुरन्तभवाटवीम् ॥ १ ॥

परशिव मम जन्म धन्यमेत-
त्तव महिमस्तुतिमोचितो यतोऽहम् ।
कुलमिदमखिलं द्विधा विभिन्नं
परमपदं गतमेव ते प्रसादात् ॥ २ ॥

हतो मायामृत्युर्गुरुवचनखड्गेन मनसः
प्रभिन्नं मालिन्यं व्यपहृतमहङ्कारतिमिरम् ।
हृता मे कामाद्याः प्रबलरिपवः स्वात्मविषयाः
महेश त्वत्सेवाविदितसुविवेकाग्निमहसा ॥ ३ ॥

जातिर्लज्जा निजकुलमदः सर्वसंशीतिराधि-
र्देहाहन्ता सुकृतदुरितद्वन्द्वपाशोऽभिमानः ।
सर्वे ह्येते मम विनिहतास्त्वन्महावाक्यसूर्य-
ज्योतिःपुञ्जैः किमपरमहं देव भद्रं समीहे ॥ ४ ॥

मद्विद्याभ्यसनमभूदिहैव सार्थं
सान्निध्यात्तव च तदुक्तिगोचरस्य ।
अद्य त्वं त्रिभुवनवाङ्मनस्यलभ्यो
निर्बाधः सकलपथैकगम्यमूर्ते ॥ ५ ॥

श्रुतिस्मृतिमिथःपथे प्रचलितोऽहमेकान्ततः
प्रचोः शिवगुरोस्तव त्रिजगदुन्नताज्ञां गतः ।
भजामि परपावकं त्रिजगदात्महव्याशिनं
भवन्तमधिदैवतं भववने ज्वलन्तं स्वतः ॥ ६ ॥

ब्रह्मत्वं सुरनायकत्वमखिलं क्षोणीपतित्वं लसद्-
ब्राह्मण्यं सुरयक्षनागपितृता गन्धर्वता सिद्धता ।
एतत्सर्वमनित्यमेव गणितं नाहं समीहे सुखं
किन्तु त्वत्पदपद्मनिश्चलतरध्यानं समीहे विभो ॥ ७ ॥

सम्प्राप्ता कृतकृत्यता सफलता वाचां तव स्तोत्रता
मृत्योरप्रमितैश्च मृत्युरभवद्वश्यं गतं त्वत्पदम् ।
संसारानवधिप्रचण्डजलधिस्तीर्णः प्रमोहो हतः
पुण्यं पापमगाद्विनाशमिह मे प्राप्तः प्रबोधो विभो ॥ ८ ॥

इति परशिवशम्भोऽनन्तकान्ते महिम्न-
स्तव विरचितमेतत्स्तोत्रमात्मोक्तिशक्त्या ।
प्रभवतु सुमुदे ते त्वं मम स्वान्तवर्ती
भव भवगतदुःखं छिन्धि चागः क्षमस्व ॥ ९ ॥

यावांस्ते जीवलोकः परशिवचतुराशीतिलक्षैकसंख्य-
स्तत्तत्कर्मप्रभेदोपगतजनिमृती घोरसंसारचक्रे ।
सृष्टिस्थित्यन्तवृत्ति भजति निरवधित्वत्पदध्यानहीनो
दृष्ट्वैनं भीतभीतं शरणमुपगतं त्राहि मां देव मृत्यो ॥१०॥

दुर्वासाः सत्यवासाः कनकगिरिरहं कन्दरे मे हृदाख्ये
श्लोकाश्चैते मृगेन्द्राः पदनखदशनाः शाम्भवास्त्रैकवीर्याः ।
मायाध्वान्तेभयूथप्रदलनपटवो ब्रह्मविद्याटवीस्थाः
वक्तॄन्श्रोतॄन्प्रमातॄन्निजहृदयगुहाब्रह्मसत्तां नमन्ति ॥ ११ ॥

भूष्यं वैदुष्यमुद्यद्दिनकरकिरणाकारमाकारतेजः
प्रज्ञानं भूरिमानं निजकरकलितं दुर्गमं योगमार्गम् ।
आयुष्यं ब्रह्मपोष्यं हरगिरिविशदां कीर्तिमभ्येत्य भूमौ
देहान्ते ब्रह्मपारं परशिवचरणाकारमभ्येति विद्वान् ॥ १२ ॥

ये श्रीशाम्भवशासने कृतधियः श्रीशासने कर्मठाः
श्रौतस्मार्तविधिष्वमन्दमतयः सत्यव्रता ब्राह्मणाः ।
विद्वांसः सकलागमेषु च कलाविद्यासु ते शाम्भव-
ब्रह्मप्राप्तिमवाप्नुवन्ति पठनाच्छम्भोर्महिम्नः स्तुतेः ॥ १३ ॥

स्त्रोत्रं चैतत्पठेद्यः शिवगुरुवदनाघोरविद्यात्तदीक्षः
सत्यज्ञानप्रकाशात्प्रबलभवरिपुं पुण्यपापाद्यविद्याम् ।
भित्त्वा मुक्तो विकल्पस्त्रिजगति महितं सौख्यमात्मप्रबोधं
तेजः कीर्तिं च लक्ष्मीमभिलषितपदं व्यश्नुते स्त्रोत्रवीरः ॥१४॥

महिम्नः स्तोत्रस्य त्रिभुवनगुरोर्यो जपरतः
पराशक्तेस्तत्त्वं परशिवपदं वेत्ति स बुधः ।

अगाधं गाम्भीर्यं स्तुतिगतमनन्तप्रमितिजं
समस्ताः सिद्धीरप्यनुभवति गच्छेत्परपदम् ।। १५ ।।

श्रीक्रोधभट्टारकदिव्यनाम्ना दुर्वाससा सूक्तमहामहिम्नः ।
स्त्रोत्रं पठेद्यो भुवनाधिपत्यं नित्यं गुरुत्वं शिवतामुपैति ।।१६।।

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ।। १७ ।।

सदसदनुग्रहनिग्रहगृहीतमुनिविग्रहो भगवान् ।
सर्वासामुपनिषदां दुर्वासा जयति देशिकः प्रथमः ।। १८ ।।

श्रीगुरुकरुणालक्ष्यो यः कोप्यात्मविदनुगृहीतिपरः ।
परशम्भुस्तुतिबोधो जगदाधारो भवेत्सदा धीरम् ।। १९ ।।

परशम्भोस्स्तव पद्यं रविप्रकरणं पठंस्त्रिकालेऽपि ।
रविरिव जगत्प्रकाशमतिचातुर्याज्जगद्गुरुर्भवति ।। २० ।।

तस्मात्स्मृतिमतिबुद्धिप्रज्ञावानात्मविन्महादेवः ।
परशम्भोस्तव हृदयं सत्पात्रेषु प्रकाशयेत् सदयम् ।। २१ ।।

इति श्रीदूर्वासाकृतपरशम्भुमहिम्नः स्तवे उपसंहारप्रकरणं त्रयोदशम् ।

इति श्रीक्रोधभट्टारकापरनाम्ना महामहिम्ना दुर्वाससा मुनीश्वरेण
विरचितः परशम्भुमहिम्नःस्तवः सम्पूर्णः ।

श्रीसुभगोदयस्तुतिः

भवानि त्वां वन्दे भवमहिषि सच्चित्सुखवपुः
पराकारां देवीममृतलहरीमैन्दवकलाम् ।
महाकालातीतां [1]कलितसरणीकल्पिततनुं
सुधासिन्धोरन्तर्वसतिमनिशं वासरमयीम् ॥ १ ॥

मनस्तत्त्वं जित्वा नयनमथ नासाग्रघटितं
[2]पुनर्व्यावृत्ताक्षः स्वयमपि यदा पश्यति पराम् ।
तदानीमेवास्य स्फुरति बहिरन्तर्भगवती
परानन्दाकारा परशिवपरा काचिदपरा ॥ २ ॥

मनोमार्गं जित्वा मरुत इह नाडीगणजुषो
निरुध्यार्कं सेन्दुं दहनमपि सञ्ज्वाल्य शिखया ।
सुषुम्णां संयोज्य श्लथयति च षड्ग्रन्थि शशिनं
तवाज्ञाचक्रस्थं [3]विलयति महायोगिसमयी ॥ ३ ॥

यदा तौ चन्द्रार्कौ निजसदनसंरोधनवशा-
[4]दशक्तौ पीयूषस्रवणहरणे सा च भुजगी ।
प्रबुद्धा क्षुत्क्रुद्धा दशति शशिनं बैन्दवगतं
सुधाधारासारैः स्नपयसि तनुं बैन्दवकले ॥ ४ ॥

पृथिव्यापस्तेजः पवनगगने तत्प्रकृतयः
[5]स्थितास्तन्मात्रास्ता विषयदशकं मानसमिति ।
[6]ततो माया विद्या तदनु च महेशः शिव इतः
परं तत्त्वातीतं मिलितवपुरिन्दोः परकला ॥ ५ ॥

कुमारी यन्मन्द्रं ध्वनति च ततो योषिदपरा
कुलं त्यक्त्वा [7]रौति स्फुटति च [8]महाकालभुजगी ।
ततः पातिव्रत्यं भजति दहराकाशकमले
सुखासीना योषा भवसि भवसीत्काररसिका ॥ ६ ॥

---

१. कलितसरणिं कल्पिततनुं । २. पुनर्व्यावृत्ताक्षिद्वयमपि । ३. श्लथयति, विलसति । ४. दशक्ता । ५. स्थितास्तन्मात्राप्ता । ६. तया । ७. काचिद् । ८. महाकालपतगी, महानीलभुजगी ।

त्रिकोणं ते कौलाः कुलगृहमिति प्राहुरपरे
चतुष्कोणं प्राहुः समयिन इमे बैन्दवमिति
[1]सुधासिन्धौ तस्मिन्सुरमणिगृहे सूर्यशशिनो-
रगम्ये रश्मीनां समयसहिते त्वं [2]विहरसे ॥ ७ ॥

त्रिखण्डं ते चक्रं शुचिरविशशाङ्कात्मकतया
मयूखैः [3]षट्त्रिंशद्दशयुततया खण्डकलितैः ।
पृथिव्यादौ तत्त्वे पृथगुदितवद्भिः परिवृतं
[4]भवेन्मूलाधारात्प्रभृति तव षट्चक्रसदनम् ॥ ८ ॥

शतं चाष्टौ वह्नेः शतमपि कलाः षोडश रवेः
शतं [5]षट् च त्रिंशत्सितमयमयूखाश्चरणजाः ।
य एते षष्टिश्च त्रिशतमभवंस्त्वच्चरणजा[6]
[7]महाकौलैस्तस्मान्न हि तव शिवे कालकलना ॥ ९ ॥

त्रिकोणं चाधारं [8]त्रिपुरतनु तेऽष्टारमनघे
[9]भवेत्स्वाधिष्ठानं पुनरपि दशारं मणिपुरम् ।
दशारं ते संवित्कमलमथ मन्वश्रकमुमे
विशुद्धं स्यादाज्ञा शिव इति ततो बैन्दवगृहम् ॥ १० ॥

त्रिकोणे ते वृत्तत्रितयमिभकोणे वसुदलं
कलाश्रं मिश्रारे भवति भुवनाश्रे च[10] भुवनम् ।
चतुश्चक्रं शैवं निवसति [11]भगे शाक्तिकमुमे
प्रधानैक्यं षोढा भवति च तयोः शक्तिशिवयोः ॥ ११ ॥

कलायां बिन्द्वैक्यं तदनु च तयोर्नादविभवे
तयोर्नादेनैक्यं तदनु च कलायामपि तयोः ।
तयोर्बिन्दावैक्यं त्रितयविभवैक्यं परशिवे
[12]तदेवं षोढैक्यं भवति हि सपर्या समयिनाम् ॥ १२ ॥

---

१. सुधासिन्धोस्तस्मिन् । २. विहरसि । ३. षट्त्रिंशत्त्रिशतयुतमाखण्ड०, षट्त्रिंशच्छतयुततया । ४. भवेन्मूलाधारप्रभृति । ५. षट्त्रिंशद्द्वे षट्त्रिंशद्वै सितमयि । ६. ०चरणगा । ७. महाकालस्तस्मात् । ८. त्रिभुवननुते, त्रिभुवन-नुतेऽष्वार० । ९. तव स्वाधिष्ठानं भगवति । १०. त्रिभुवनम् । ११. दशे शक्तिकमुमे, भगे शाक्तकमुमे । १२. तथैवं ।

कला नादो बिन्दुः क्रमश इह वर्णाश्च चरणं
षडब्जं चाधारप्रभृतिकममीषां च मिलनम् ।
[1]तदेवं षोढैक्यं भवति खलु येषां समयिनां
चतुर्थैक्यं तेषां भवति हि सर्पया समयिनाम् ॥ १३ ॥

तडिल्लेखामध्ये स्फुरति मणिपुरे भगवती
चतुर्धैक्यं तेषां भवति च चतुर्बाहुरुदिता ।
धनुर्बाणानिक्षूद्भवकुसुमजानङ्कुशवरं
तथा पाशं बिभ्रत्युदितरविबिम्बाकृतिरुचिः[2] ॥ १४ ॥

भवत्यैक्यं षोढा भवति भगवत्याः समयिनां
मरुत्वत्कोदण्डद्युतिनियुतभासा समरुचिः ।
भवत्पाणिव्रातो दशविध इतीदं मणिपुरे
भवानि प्रत्यक्षं तव वपुरुपास्ते न हि परम् ॥ १५ ॥

इत्यैक्यनिरूपणम् ॥

भवानि श्रीहस्तैर्वहसि फणिपाशं सृणिमथो
धनुः पौण्ड्रं पौष्पं शरमथ जपस्रक्शुकवरौ ।
अथ द्वाभ्यां मुद्रामभयवरदानैकरसिकां[3]
क्वणद्वीणां द्वाभ्यां [4]त्वमुरसि कराभ्यां च बिभृषे ॥ १६ ॥

त्रिकोणैरष्टारं त्रिभिरपि दशारं समुदभू-
द्दशारं भूगेहादपि च भुवनाश्रं समभवत् ।
ततोऽभून्नागारं नृपतिदलमस्मात्त्रिवलयं
[5]चतुर्द्धाःप्राकारत्रितयमिदमेवाम्ब [6]शरणम् ॥ १७ ॥

चतुःषष्टिस्तन्त्राण्यपि [7]कुलमतं निन्दितमभू-
द्यदेतन्मिश्राख्यं मतमपि भवेन्निन्दितमिह ।
शुभाख्याः पञ्चैताः श्रुतिसरणिसिद्धाः प्रकृतयो
महाविद्यास्तासां भवति [8]परमार्थो भगवती ॥ १८ ॥

स्मरो मारो मारः स्मर इति [9]परो मारमदन-
स्मरानङ्गाश्चेति[10] स्मरमदनमारा स्मर इति ।

---

१. तथैवं । २. ०कृतिरुचिम् । ३. ०रसिके । ४. उरसि च । ५. चतुर्धा । ६. चरणम् । ७. कुलमुतं निन्दितमिदं यदेत० । ८. परमार्था, परमार्थो भगवति । ९. स्मरो । १०. ०श्चैते ।

त्रिखण्डः खण्डान्ते [1]कलितभुवनेश्यक्षरयुत-
श्चतुःपञ्चार्णास्ते त्रय इति च पञ्चाक्षरमनुः[2] ॥ १९ ॥

त्रिखण्डे त्वन्मन्त्रे शशिसवितृवह्न्यात्मकतया
स्वराश्चन्द्रे लीनाः सवितरि कलाः कादय इह ।
यकाराद्या वह्नावथ कषयुगं बैन्दवगृहे
निलीनं सादाख्ये शिवयुवति नित्यैन्दवकले ॥ २० ॥

ककाराकाराभ्यां स्वरगणमवष्टभ्य निखिलं
कलाप्रत्याहारात्सकलमभवद्व्यञ्जनगणः ।
त्रिखण्डे स्यात्प्रत्याहरणमिदमन्वक्कषयुगं[3]
क्षकारश्चाकारोऽक्षरतनुतया चाक्षरमिति ॥ २१ ॥

[4]विदेहेन्द्रापत्यं श्रुत इह ऋषिर्यस्य च मनो-
रयं चार्थः सम्यक्श्रुतिशिरसि तैत्तिर्यकऋचि ।
ऋषिं हित्वा चास्या हृदयकमले नैतमृषिमि-
त्यृचाभ्युक्तः पूजाविधिरिह भवत्याः समयिनाम् ॥ २२ ॥

त्रिखण्डस्त्वन्मत्रस्तव च सरघायां निविशते
श्रियो देव्याः शेषो यत इह समस्ताः शशिकलाः ।
त्रिखण्डे त्रैख्यड्यं निवसति समन्त्रे च सुभगे
षडब्जारण्यानी त्रितययुतखण्डे निवसति ॥ २३ ॥

त्रयं चैतत्स्वान्ते परमशिवपर्यङ्कनिलये
परे [5]सादाख्येऽस्मिन्निवसति चतुर्धैक्यकलनात् ।
स्वरास्ते लीनास्ते भगवति कलाश्रे च सकलाः
ककराद्या वृत्ते तदनु चतुरश्रे च यमुखाः ॥ २४ ॥

हलो बिन्दुर्वर्गाष्टकमिभदलं शाम्भववपु-
श्चतुश्चक्रं [6]शक्रस्थितमनुभयं शक्तिशिवयोः ।
निशाद्या दर्शाद्याः श्रुतिनिगदिताः [7]पञ्जदशधा
भवेयुर्नित्यास्तास्तव[8] जननि मन्त्राक्षरगणा ॥ २५ ॥

---

१. कलितभुवने ते क इति यः । २. ०मनोः । ३. ०मञ्चत्कषयुगं । ४. विदेहो नैऋर्त्याः सुत इह ऋषिर्यः स च । ५. सादाख्यास्मिन् । ६. शक्ता-स्थित०, शक्तौ स्थित० ७. पञ्चदश ता । ८. ०नित्याप्तास्तव ।

इमास्ताः षोडस्यास्तव च सरघायां शशिकला-
स्वरूपायां लीना निवसति तव श्रीशशिकला ।
अयं प्रत्याहारः श्रुत इह कलाव्यञ्जनगणः
ककारेणाकारः स्वरगणमशेषं कथयति ॥ २६ ॥

क्षकारः पञ्चाशत्कल इति [1]हलो बैन्दवगृहं
[2]ककारादूर्ध्वं स्याज्जननि तव नामाक्षरमिति ।
भवेत्पूजाकाले मणिखचितभूषाभिरभितः
प्रभाभिर्व्यालीढं भवति मणिपूरं सरसिजम् ॥ २७ ॥

वदन्त्येके वृद्धा मणिरिति जलं [3]तेन निबिडं
परे तु त्वद्रूपं मणिधनुरितीदं समयिनः ।
अनाहत्या [4]नादः प्रभवति सुषुम्णाध्वजनितं-
स्तदा वायोस्तत्र प्रभव इदमाहुः समयिनः ॥ २८ ॥

तदेतत्ते संवित्कमलमिति संज्ञान्तरमुमे
भवेत्संवित्पूजा भवति कमलेऽस्मिन्समयिनाम् ।
विशुद्धयाख्ये चक्रे वियदुदितमाहुः समयिनः
सदापूर्वो देवः शिव इति हिमानीसमतनुः ॥ २९ ॥

त्वदीयैरुद्द्योतैर्भवति च विशुद्धयाख्यसदनं
भवेत्पूजा देव्या हिमकरकलाभिः समयिनाम् ।
सहस्रारे चक्रे निवसति कलापञ्चदशकं
तदेतन्नित्याख्यं भ्रमति सितपक्षे समयिनाम् ॥ ३० ॥

अतः शुक्ले पक्षे [5]प्रतिदिनमिह त्वां भगवतीं
निशायां सेवन्ते निशि चरमभागे समयिनः ।
शुचिः स्वाधिष्ठाने रविरुपरि संवित्सरसिजे

इडायां पिङ्गल्यां चरत इह तौ सूर्यशशिनौ
तमस्याधारे तौ यदि तु [1]मिलितौ सा तिथिरमा।
तदाज्ञाचक्रस्थं शिशिरकरबिम्बे रविनिभं
दृढव्यालीढं सद्विगलितसुधासारविसरम्॥ ३३॥

महाव्योमस्थेन्दोरमृतलहरीप्रावितततनुः
[2]प्रशुष्यद्वै नाडीप्रकरमनिशं प्लावयति तत्।
यदाज्ञायां विद्युन्नियतनियुताभाक्षरमयी
[3]स्थिता विद्युल्लेखा भगवति विधिग्रन्थिमभिनत्॥ ३४॥

ततो गत्वा ज्योत्स्नामयसमयलोकं [4]समयिनां
पराख्या सादाख्या जयति शिवतत्त्वेन मिलिता।
सहस्रारे पद्मे शिशिरमहसां बिम्बमपरं
तदेव श्रीचक्रं सरघमिति तद्बैन्दवमिति॥ ३५॥

वदन्त्येके सन्तः परशिवपदे तत्त्वमिलिते
ततस्त्वं [5]षटविंशी भवसि शिवयोर्मेलनवपुः।
त्रिखण्डेऽस्मिन्स्वान्ते परमपदपर्यङ्कसदने
परे सादाख्येऽस्मिन्निवसति [6]चतुर्धैक्यकलनात्॥ ३६॥

[7]क्षितौ वह्निर्वह्नौ वसुदलजले दिङ्मरुति दिक्-
[8]कलाश्रे मन्वश्रं दृशि [9]वसुरथो राजकमले।
[10]प्रतिद्वैतग्रन्थिस्तदुपरि चतुर्द्वारसहितं
[11]महीचक्रं चैकं भवति भगकोणैक्यकलनात्॥ ३७॥

इति मन्त्रचक्रैक्यम्॥

[12]षडब्जारण्ये त्वां समयिन इमे पञ्चकसमां
यदा संविद्रूपां विदधति च षोढैक्यकलिताम्[13]।
मनो जित्वा [14]चाज्ञासरसिज इह प्रादुरभव-
त्तडिल्लेखा नित्या भगवति तवाधारसदनाम्॥ ३८॥

---

१. तुलिती। २. प्रशुष्यद्वेशन्त्। ३. सिता। ४. ससमया। ५. षट्त्रिंशा। ६. चतुर्थैक्य०। ७. महावह्नि०। ८. क्कलारे। ९. वसुरधो। १०. प्रतिद्वयैत-द्ग्रन्थि०। ११. महाचक्रं। १२. षडब्जारण्यैस्त्वां। १३. ०कलितम्। १४. ०सरसिजमिह।

भवत्साम्यं केचित्त्रतयमिति [1]कौलप्रभृतयः
परं तत्त्वाख्यं [2]चेत्यपरमिदमाहुः समयिनः ।
क्रियावस्थारूपं प्रकृतिरभिधापञ्चकसमं
तदेषां साम्यं [3]स्यादवनिषु च यो वेत्ति स मुनिः ॥

इत्यैक्यनिरूपणम् ।

वशिन्याद्या अष्टावकचटतपाद्याः प्रकृतयः
स्ववर्गस्थाः स्वस्वायुधकलितहस्ताः स्वविषयाः ।
[4]यथावर्गं वर्णप्रचुरतनवो याभिरभवं-
स्तव प्रस्तारास्ते त्रय इति जगुस्ते समयिनः ॥ ४१ ॥

इमा नित्या वर्णास्तव चरणसम्मेलनवशा-
न्महामेरुस्थाः [5]स्युर्मनुमिलनकैलासवपुषः ।
वशिन्याद्या एता अपि [6]तव सबिन्द्वात्मकतया
महीप्रस्तारोऽयं क्रम इति रहस्यं समयिनाम् ॥ ४१ ॥

इति प्रस्तारत्रयनिरूपणम् ॥

भवेन्मूलाधारं तदुपरितनं चक्रमपि तद्-
द्वयं तामिस्राख्यं शिखिकिरणसम्मेलनवशात् ।
तदेतत्कौलानां प्रतिदिनमनुष्ठेयमुदितं
भवत्या वामाख्यं मतमपि परित्याज्यमुभयम् ॥ ४२ ॥

अमीषां कौलानां भगवति भवेत्पूजनविधि-
स्तव स्वाधिष्ठाने तदनु च भवेन्मूलसदने ।
अतो बाह्या पूजा भवति भगरूपेण च ततो
निषिद्धाचारोऽयं निगमविरहोऽनिन्द्यचरिते ॥ ४३ ॥

नवव्यूहं कौलप्रभृतिकमतं[7] तेन स विभु-
र्नवात्मा देवोऽयं जगदुदयकृद्भैरववपुः[8] ।
नवात्मा वामादिप्रभृतिभिरदं [9]भैरववपु-
र्महादेवी ताभ्यां जनकजननीमज्जगदिदम् ॥ ४४ ॥

---

१. कौम्भप्र० । २. चेत्स पर इद०, परमिद० । ३. त्वामवनिषु । ४. यदा वर्गा वर्णप्रचुरतरवो । ५. ०स्थास्यन्मनु० । ६. च सहबि० । ७. प्रभृतिकमिदं । ८. कृच्छैशववपुः । ९. बैन्दववपुः ।

भवेदेतच्चक्रद्वितयमतिदूरं समयिनां
विसृज्यैतद्युग्मं तदनु मणिपूराख्यसदने ।

सहस्रारे पद्मे सुभगसुभगोदेति[1] सुभगे
परं सौभाग्यं यत्तदिह तव सायुज्यपदवी ॥ ५१ ॥
[2]अतोऽस्याः संसिद्धौ सुभगसुभगाख्या गुरुकृपा-
कटाक्षव्यासङ्गात्स्रवदमृतनिष्यन्दसुलभा ।
तया विद्धो योगी विचरति निशायामपि दिवा
[3]दिवा भानू रात्रौ विधुरिव [4]कृतार्थीकृतमतिः ॥ ५२ ॥

इति श्रीगौडपादाचार्यविरचिता सुभगोदयस्तुतिः
सम्पूर्णा[5] ।

---

१. ०क्तेति सुभगं । २. अतस्ते संसिद्धा । ३. दिवा वा रात्रौ वा
३. कृतार्थीकृत इति ।

५ सौन्दर्यलहरी की लक्ष्मीधरा टीका से ज्ञात होता है कि अनुष्टप् छन्दों वाला भी कोई 'सुभगोदय' नामक ग्रन्थ था जिस पर भगवत्पाद श्रीशङ्कराचार्य एवं लक्ष्मीधर ने टीका लिखी थी । यथा—

तदुक्तं सुभगोदये—'परोऽपि शक्तिरहितः शक्तः कर्तुं न किञ्चन । शक्तः स्यात्परमेशानि शक्त्या युक्तो भवेद्यदि । (श्लोक ११ की टीका)

'एतत्सर्वं सुभगोदयव्याख्यानावसरे चन्द्रकलायां सम्यङ्निरूपितमस्माभिः ।'
(श्लोक १७ टी०)

'यथोक्तं भगवत्पादैः सुभगोदयव्याख्याने—शिखिज्वालारूपा समय इह सैवात्र समया तयोः सम्भेदो मे दिशतु हृदयाब्जैकनिलयः । (श्लोक ३८)

लल्ल की भी सुभगोदय पर टीका थी—

'अनेनैवाशयेन सुभगोदयटीकायां लल्लेनोक्तम्—'(सौभाग्यभास्कर पृ०७७)

वासनासुभगोदय का भी उल्लेख मिलता है—

'तदुक्तं वासनासुभगोदये—दर्शाद्याः पूर्णिमान्ताद्याः कलाः पञ्चदशैव तु । षोडशी तु कला ज्ञेया सच्चिदानन्दरूपिणी ।' (वही पृ०)

महाकविकालिदासविरचिता

पञ्चस्तवी

(१) लघुस्तुतिः

ऐन्द्रस्येव शरासनस्य दधती मध्ये ललाटं प्रभां
शौक्लीं कान्तिमनुष्णगोरिव शिरस्यातन्वती सर्वतः ।
एषाऽसौ त्रिपुरा हृदि द्युतिरिवोष्णांशोस्सदाहस्थिता
छिन्द्यान्नस्सहसा पदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी ॥ १ ॥

या मात्रा त्रपुकीलिता तनुलसत्तन्तुस्थितिस्पर्धिनी
वाग्बीजे प्रथमे स्थिता हृदि सदा तां मन्महे ते वयं ।
शक्तिः कुण्डलिनीति विश्वजननी व्यापारबद्धोद्यमा
ज्ञात्वेत्थं न पुनः स्पृशन्ति जननीगर्भेऽर्भकत्वं नराः ॥ २ ॥

दृष्ट्वा सम्भ्रमकारिवस्तु सहसा ऐ-ऐ इति व्याहृतं
येनाकूतवशादपीह वरदे बिन्दुं विनाऽप्यक्षरम् ।
तस्यापि ध्रुवमेव देवि तरसा का ते तवानुग्रहे
वाचस्सूक्तिसुधारसद्रवमुचो निर्यान्ति वक्त्राम्बुजात् ॥ ३ ॥

यन्नित्ये तव कामराजपरं मन्त्राक्षरं निष्कलं
तत्सारस्वतमित्यवैति विरलः कश्चिद्बुधश्चेद्भुवि ।
आख्यानं प्रतिपर्व सत्यतपसो यत्कीर्तयन्तो द्विजाः
प्रारम्भे प्रणवास्पदप्रणयितां नीत्वोच्चरन्ति स्फुटम् ॥ ४ ॥

यत्सद्यो वचसां प्रवृत्तिकरणे दृष्टप्रभावं बुधै-
स्तार्तीयं तदहं नमामि मनसा त्वद्बीजमिन्दुप्रभम् ।
अस्त्यारोपिसरस्वतीमनुगतो जाड्याम्बुविच्छित्तये
गोशब्दो गिरि वर्तते स नियतं योगं विना सिद्धिदः ॥ ५ ॥

एकैकं तव देवि बीजमनघं स व्यञ्जना व्यञ्जनं
कूटस्थं यदि वा पृथक्क्रमगतं यद्वा स्थितं व्युत्क्रमात् ।
यं यं काममपेक्ष्य येन विधिना केनापि वा चिन्तितं
जप्तं वा सफलीकरोति तरसा तं तं समस्तं नृणाम् ॥६॥

वामे पुस्तकधारिणीमभयदां साक्षस्रजं दक्षिणे
भक्तेभ्यो वरदानपेशलकरां कर्पूरकुन्दोज्ज्वलाम् ।
उज्जृम्भाम्बुजपत्रकान्तिनिवहस्निग्धप्रभालोकिनीं
ये त्वामम्ब न शीलयन्ति मससा तेषां कवित्वं कुतः ॥ ७ ॥

ये त्वां पाण्डरपुण्डरीकपटलस्रग्भाभिरामप्रभां
सिञ्चन्तीममृतद्रवैरिव शिवे ध्यायन्ति मूर्ध्नि स्थिताम् ।
अश्रान्तं विकटस्फुटाक्षरपदं निर्याति वक्त्रोदरा-
त्तेषां भारति भारतीसुरसरित्कल्लोललोलोर्मिवत् ॥ ८ ॥

ये सिन्दूरपरागपुञ्जपिहितां त्वत्तेजसा द्यामिमा-
मुर्वीं चापि विलीनयावकरसप्रस्तारमग्नामिव ।
ध्यायन्ति क्षणमप्यनन्यमनसस्तेषामनङ्गज्वर-
क्लान्तास्त्रस्तकुरङ्गशावकदृशो वश्या भवन्ति स्त्रियः ॥९॥

चञ्चत्काञ्चनकुण्डलाङ्गदधरामाबद्धकाञ्चीस्रजं
ये त्वां चेतसि तद्गतेक्षणमपि ध्यायन्ति कृत्वा स्त्रियम् ।
तेषां वेश्मसु विभ्रमादहरहस्स्फारीभवन्त्यश्चिरं
माद्यत्कुञ्जरकर्णतालतरला स्थैर्यं भजन्ति श्रियः ॥ १० ॥

आर्भटघा शशिखण्डमण्डनजटाजूटां नृमुण्डस्रजं
बन्धूकप्रसवारुणाम्बरधरां प्रेतासनाध्यसिनीम् ।
त्वां ध्यायन्ति चतुर्भुजां त्रिनयनामापीनतुङ्गस्तनीं
मध्ये निम्नवलित्रयाङ्कितततनुं त्वद्रूपसंवित्तये ॥ ११ ॥

जातोऽप्यल्पपरिच्छदे क्षितिभुजां सामान्यमात्रे कुले
निश्शेषावनिचक्रवर्तिपदवीं लब्ध्वा प्रतापोन्नतः ।
यद्विद्याधरवृन्दवन्दितपदः श्रीवत्सराजोऽभव-
द्देवि त्वच्चरणाम्बुजप्रणतिजस्सोऽयं प्रसादोदयः ॥ १२ ॥

चण्डि त्वच्चरणाम्बुजार्चनविधौ बिल्वीदलोल्लुण्ठना-
त्त्रुटचत्कण्टककोटिभिः परिचयं येषां न जग्मुः कराः ।
ते दण्डाङ्कुशचक्रचापकुलिशश्रीवत्समत्स्याङ्कितै-
र्जायन्ते पृथिवीभुजः कथमिवाम्भोजप्रभैः पाणिभिः ॥ १३ ॥

विप्राः क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवैः-
स्त्वां देवि त्रिपुरे परापरमयीं सन्तर्प्य पूजाविधौ ।

यां यां प्रार्थयते मनस्स्थिरतया तेषां त एते ध्रुवं
तां तां सिद्धिमवाप्नुवन्ति तरसा विघ्नैरविघ्नीकृताः ॥१४॥

शब्दानां जननि त्वमत्र भुवने वाग्वादिनीत्युच्यसे
त्वत्तः केशववासवप्रभृतयोऽप्याविर्भवन्ति ध्रुवम् ।
लीयन्ते खलु यत्र कल्पविरमे ब्रह्मादयस्तेऽप्यमी
सा त्वं काचिदचिन्त्यरूपगरिमा शक्तिः परा गीयसे ॥१५॥

देवानां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिस्वरा-
स्त्रैलोक्यं त्रिपुटी त्रिपुष्करमथ त्रिब्रह्म वर्णास्त्रयः ।
यत्किञ्चिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गात्मकं
तत्सर्वं त्रिपुरेति नाम भगवत्यन्वेति ते तत्त्वतः ॥ १६ ॥

लक्ष्मीं राजकुले जयां रणमुखे क्षेमङ्करीमध्वनि
क्रव्यादद्विपसर्पभाजि शवरीं कान्तारदुर्गे गिरौ ।
भूतप्रेतपिशाचजृम्भकभये स्मृत्वा महाभैरवीं
व्यामोहे त्रिपुरां तरन्ति विपदस्तारां च तोयप्लवे ॥ १७ ॥

माया कुण्डलिनी क्रिया मधुमयी काली कलामालिनी
मातङ्गी विजया जया भगवती गौरी शिवा शाम्भवी ।
शक्तिश्शङ्करवल्लभा त्रिनयना वाग्वादिनी भैरवी
ह्रींकारी त्रिपुरे परापरमयी माता कुमारीत्यसि ॥ १८ ॥

आईपल्लवितैः परस्परयुतैर्द्वित्रिक्रमाद्यक्षरैः
काद्यैः क्षान्तगतैस्स्वरादिभिरथ क्षान्तैश्च तैस्सस्वरैः ।
नामानि त्रिपुरे भवन्ति खलु यान्यत्यन्तगुह्यानि ते
तेभ्यो भैरवपत्नि विंशतिसहस्रेभ्यः परेभ्यो नमः ॥ १९ ॥

बोद्धव्या निपुणं पदैः स्तुतिरियं कृत्वा मनस्तद्गतं
भारत्या त्रिपुरेत्यनन्यमनसो यत्राद्यपद्यैः स्फुटम् ।
एकद्वित्रिपदक्रमेण कथितस्त्वत्पादसंख्याक्षरै-
र्मन्त्रोद्धारनिधिर्विशेषसहितस्सत्सम्प्रदायान्वितः ॥ २० ॥

सावद्यं निरवद्यमस्तु यदि वा किंवाऽनया चिन्तया
नूनं स्तोत्रमिदं पठिष्यति जनो यस्यास्ति भक्तिस्त्वयि ।

सञ्चिन्त्यापि लघुत्वमात्मनि दृढं सञ्चायमानं हठात्-
त्वद्भक्त्या मुखरीकृतेन सुचिरं यस्मान्मयाऽपि ध्रुवम् ॥२१॥
इति श्रीदेवीलघुस्तुतिस्सम्पूर्णा ॥

---

(२) घटस्तवः

आनन्दमन्थरपुरन्दरमुक्तमाल्यं
मौलौ हठेन निहितं महिषासुरस्य ।
पादाम्बुजं भवतु मे विजयाय मञ्जु-
मञ्जीरशिञ्जितमनोहरमम्बिकायाः ॥ १ ॥

देवि त्र्यम्बकपत्नि पार्वती सति त्रैलोक्यमात विशे
शर्वाणि त्रिपुरे मृडानि वरदे रुद्राणि कात्यायनि ।
भीमे भैरवि चण्डि शर्वरि कले कालक्षये शूलिनि
त्वत्पादप्रणताननन्यमनसः पर्याकुलान्पाहि नः ॥ २ ॥

देवि त्वां सकृदेव यः प्रणमति क्षोणीभृतस्तं नम-
न्त्याजन्मस्फुरदङ्घ्रिपीठविलुठत्कोटीरकोटिच्छटाः ।
यस्त्वामर्चति सोऽर्च्यते सुरगणैर्यः स्तौति स स्तूयते
यस्त्वां ध्यायति तं स्मरार्तिविधुरा ध्यायन्ति वामभ्रुवः ॥३॥

उन्मत्ता इव सग्रहा इव विषव्यासक्तमूर्च्छा इव
प्राप्तप्रौढमदा इवार्तिविरहग्रस्ता इवार्ता इव ।
ये ध्यायन्ति हि शैलराजतनयां धन्यास्त एवाग्रत-
स्त्यक्तोपाधिविवृद्धरागमनसो ध्यायन्ति तान्सुभ्रुवः ॥ ४ ॥

ध्यायन्ति ये क्षणमपि त्रिपुरे हृदि त्वां
लावण्ययौवनधनैरपि विप्रयुक्ताः ।
ते विस्फुरन्ति ललितायतलोचनानां
चित्तैकभित्तिलिखितप्रतिमाः पुमांसः ॥ ५ ॥

एतं किं नु दृशा पिबाम्युत विशाम्यस्याङ्गमङ्गैर्निजैः
किं वामुं निगराम्यनेन सहसा किं वैकतामाश्रये ।
तस्येत्थं विवशो विकल्पललिताकूतेन योषिज्जनः
किं तद्यन्न करोति देवि हृदये यस्य त्वमावर्तसे ॥ ६ ॥

विश्वव्यापिनि यद्वदीश्वर इति स्थाणावनन्याश्रयः
शब्दः शक्तिरिति त्रिलोकजननि त्वय्येव तथ्यस्थितिः ।
इत्थं सत्यपि शक्नुवन्ति यदिमाः क्षुद्रा रुजो बाधितुं
त्वद्भक्तानपि न क्षिणोषि च रुषा तद्देवि चित्रं महत् ॥ ७ ॥

इन्दोर्मध्यगतां मृगाङ्कसदृशच्छायां मनोहारिणीं
पाण्डूत्फुल्लसरोरुहासनगतां स्निग्धप्रदीपच्छविम् ।
वर्षन्तीममृतं भवानि भवतीं ध्यायन्ति ये देहिन-
स्ते निर्मुक्तरुजो भवन्ति विपदः प्रोज्झन्ति तान्दूरतः ॥ ८ ॥

पूर्णेन्दोः शकलैरिवातिबहलैः पीयूषपूरैरिव
क्षीराब्धेर्लहरीभरैरिव सुधापङ्कस्य पिण्डैरिव ।
प्रालेयैरिव निर्मितं तव वपुर्ध्यायन्ति ये श्रद्धया
चित्तान्तर्निहितार्तितापविपदस्ते सम्पदं बिभ्रति ॥ ९ ॥

ये संस्मरन्ति तरलां सहसोल्लसन्तीं
त्वां ग्रन्थिपञ्चकमिदं तरुणार्कशोणाम् ।
रागार्णवे बहलरागिणि मज्जयन्तीं
कृत्स्नं जगद्दधति चेतसि तान्मृगाक्ष्यः ॥ १० ॥

लाक्षारसस्नपितपङ्कजतन्तुतन्वी-
मन्तस्मरत्यनुदिनं भवतीं भवानि ।
यस्तं स्मरप्रतिममप्रतिमस्वरूपा
नेत्रोत्पलैर्मृगदृशो भृशमर्चयन्ति ॥ ११ ॥
स्तुमस्त्वां वाचमव्यक्तां हिमकुन्देन्दुरोचिषम् ।
कदम्बमालां बिभ्राणमापादतललम्बिनीम् ॥ १२ ॥

मूर्ध्नीन्दोः सितपङ्कजासनगतां प्रालेयपाण्डुत्विषं
वर्षन्तीममृतं सरोरुहभुवो वक्त्रेऽपि रन्ध्रेऽपि च ।
अच्छिन्ना च मनोहरा च ललिता चातिप्रसन्नापि च
त्वामेवं स्मरतः स्मरारिदयिते वाक्सर्वतो वल्गति ॥ १३ ॥

ददातीष्टान्भोगान्क्षपयति रिपून्हन्ति विपदो
दहत्याधीन्व्याधीञ्शमयति सुखानि प्रतनुते ।
हठादन्तर्दुःखं दलयति पिनष्टीष्टविरहं
सकृद्ध्याता देवी किमिव निरवद्यं न कुरुते ॥ १४ ॥

यस्त्वां ध्यायति वेत्ति विन्दति जपत्यालोकते चिन्तय-
त्यन्वेति प्रतिपद्यते कलयति स्तौत्याश्रयत्यर्चति ।
यस्तु त्र्यम्बकवल्लभे तव गुणानाकर्णयत्यादरात्
तस्य श्रीर्न गृहादपैति विजयस्तस्याग्रतो धावति ॥ १५ ॥

(३) चर्चास्तुतिः

सौन्दर्यविभ्रमभुवो भुवनाधिपत्यं
सम्पत्तिकल्पतरवस्त्रिपुरे जयन्ति ।
एते कवित्वकुमुदप्रकरावबोध-
पूर्णेन्दवस्त्वयि जगज्जननि प्रणामाः ॥ १ ॥

देविस्तुतिव्यतिकरे कृतबुद्धयस्ते
वाचस्पतिप्रभृतयोऽपि जडीभवन्ति ।
तस्मान्निसर्गजडिमा कतमोऽहमत्र
स्तोत्रं तव त्रिपुरतापनपत्नि कर्तुम् ॥ २ ॥

मातस्तथापि भवती भवतीव्रताप-
विच्छित्तये स्तुतिमहार्णवकर्णधारः ।
स्तोतुं भवानि स भवच्चरणारविन्द-
भक्तिग्रहः किमपि मां मुखरीकरोति ॥ ३ ॥

सूते जगन्ति भवती भवतीं बिभर्ति
जागर्ति तत्क्षयकृते भवती भवानि ।
मोहं भिनत्ति भवती भवती रुणद्धि
लीलायितं जगति चक्रमिदं भवत्याः ॥ ४ ॥

यस्मिन्मनागपि नवाम्बुजपत्रगौरीं
गौरीप्रसादमधुरां भृशमादधासि ।
तस्मिन्निरन्तरमनङ्गशरप्रकीर्ण
सीमन्तिनीनयनसन्ततयः पतन्ति ॥ ५ ॥

पृथ्वीभुजोऽप्युदयनप्रवरस्य तस्य
विद्याधरप्रणतिचुम्बितपादपीठः ।
यच्चक्रवर्तिपदवीं प्रणयः स एष
त्वत्पादपङ्कजरजःकणजः प्रसादः ॥ ६ ॥

कल्पद्रुमप्रसवकल्पितचित्रपूजा-
मुद्दीपितप्रियतमामदरक्तगीतैः ।
नित्यं भवानि भवतीमुपवीणयन्ति
विद्याधराः कनकशैलगुहागृहेषु ॥ ७ ॥

लक्ष्मीवशीकरणकर्मणि कामिनीना-
माकर्षणव्यतिकरेषु च सिद्धमन्त्रः ।
नीरन्ध्रमोहतिमिरच्छिदुरप्रदीपो
देवि त्वदङ्घ्रिजनितो जयति प्रसादः ।। ८ ।।

देवि त्वदङ्घ्रिनखरत्नभुवो मयूखाः
प्रत्युप्तमौक्तिरुचो मुदमुद्वहन्ति ।
सेवानतिव्यतिकरे सुरसुन्दरीणां
सीमन्तसीम्नि कुसुमस्तबकायितं यैः ।। ९ ।।

जायेत स त्रिभुवनैकगुरुस्तदानीं
देवश्शिवोऽपि भुवनत्रयसूत्रधारः ।। १५ ।।

त्वां व्यापिनीति सुमना इति कुण्डलीति
त्वां कामिनीति कमलेति कलावतीति ।
त्वां मालिनीति ललितेत्यपराजितेति
देवि स्तुवन्ति विजयेति जयेत्युमेति ।। १६ ।।

आधारमारुतनिरोधवशेन येषां
सिन्दूररञ्जितसरोजगुणानुकारि ।
तीव्रं हृदि स्फुरति देवि महस्त्वदीयं
ध्यायन्ति तानिह समीहितसिद्धसाध्याः ।। १७ ।।

ये चिन्तयन्त्यरुणमण्डलमध्यवर्ति-
रूपं तवाम्ब नवयावकपङ्करम्यम् ।
तेषां तथैव कुसुमायुधबाणभिन्न-
वक्षःस्थलामृगदृशो वशगा भवन्ति ।। १८ ।।

त्वामैन्दवीमिव कलामनुफालदेश-
मुद्भासिताम्बरतलामवलोकयन्ति ।
सद्यो भवानि सुधियः कवयो भवन्ति
त्वं भावनाधिकधियां किल कामधेनुः ।। १९ ।।

उत्तप्तहेमरुचिरे त्रिपुरे पुनीहि
चेतश्चिरन्तनमघौघवनं लुनीहि ।
कारागृहे निगडबन्धनयन्त्रितस्य
त्वत्संस्मृतो झटिति तन्निगडा गलन्ति ।। २० ।।

लक्ष्मीवशीकरणचूर्णसहोदराणि
त्वत्पादपङ्कजरजांसि शिवे जयन्ति ।
यानि प्रणाममिलितानि नृणां ललाटे
शंसन्ति धातृलिखितानि दुरक्षराणि ।। २१ ।।

यः स्तोत्रमेतदनुवासरमम्बिकायाः
श्रेयस्करं पठति वा यदि वा शृणोति ।
तस्येप्सितं फलति राजभिरीड्यतेऽसौ
जायेत स प्रियतमो मदिरेक्षणानाम् ।। २२ ।।

खड्गं पादुकमञ्जनं च घुटिकां सारस्वतं सम्पदं
मृत्योर्वञ्चनमुग्रकालहरणं देहस्थिते कारणम् ।
भ्रूभङ्गादगतुङ्गवृक्षपतनं वश्यं जगद्योषितां
चर्चा जाप्यमिदं करोति सततं त्वत्पूजकस्येप्सितम् ॥ २३ ॥

इति श्रीकालिदासविरचिता चर्चास्तुतिः सम्पूर्णा ॥

---

(४) अम्बास्तुतिः

यामामनन्ति मुनयः प्रकृतिं पुराणीं
विद्येति यां श्रुतिरहस्यगिरो गृणन्ति ।
तामर्धपल्लवितशङ्कररूपमुद्रां
देवीमनन्यशरणश्शरणं प्रपद्ये ॥ १ ॥

अम्ब स्तवेषु तव तावदकृत्रिमाणि
कुण्ठीभवन्ति वचसामपि गुम्फनानि ।
डिम्भस्य मे स्तुतिरसावसमञ्जसापि
वात्सल्यनिघ्नहृदयां भवतीं धिनोतु ॥ २ ॥

व्योमेति बिन्दुरिति नाद इतीन्दुरेखा-
रूपेति वाग्भवतनूरिति मातृकेति ।
निष्यन्दमानसुखबोधसुधास्वरूपा
विद्योतसे मनसि भाग्यवतां जनानाम् ॥ ३ ॥

आविर्भवत्पुलकसंहतिभिश्शरीरै-
र्निष्यन्दमानसलिलैर्नयनैश्च नित्यम् ।
वाग्भिश्च गद्‌गदपदाभिरुपासते ये
पादौ तवाम्ब भुवनेषु त एव धन्याः ॥ ४ ॥

वक्त्रं यदुद्यतमभिष्टुतये भवत्या
स्तुभ्यं नमो यदपि देवि शिरः करोति ।
चेतश्च यत्त्वयि परायणमेव तानि
कस्यापि तैरपि भवन्ति तपोविशेषैः ॥ ५ ॥

मूलालवालकुहरादुदिता भवानि
निर्भिद्य षट्सरसिजानि तडिल्लतेव

भूयोऽपि तत्र विशति ध्रुवमञ्चितेन्दु-
निष्यन्दमानपरमामृतवृष्टिरूपा ॥ ६ ॥

दग्धं पुरा मदनमेकमनेकधा ते
मुग्धः कटाक्षविधिरङ्कुरयाञ्चकार ।
धत्ते तदा प्रभृति देवि ललाटनेत्रं
सत्यं ह्रियैव मुकुलीकृतमिन्दुमौलिः ॥ ७ ॥

अज्ञातसम्भवमनाकलितान्ववायं
भिक्षुं कपालिनमवाससमद्वितीयम् ।
पूर्वं करग्रहणमङ्गलतो भवत्या
श्शम्भुं क एव बुबुधे गिरिराजकन्ये ॥ ८ ॥

चर्माम्बरं च शवभस्मविलेपनं च
भिक्षाटनं च वसतिश्च परेतभूमौ ।
बेतालसंहतिपरिग्रहता च शम्भोः
शोभां वहन्ति गिरिजे तव साहचर्यात् ॥ ९ ॥

कल्पोपसंहरणकेलिषु पण्डितानि
चण्डानि खण्डपरशोरपि ताण्डवानि ।
अलोकितेन तव कोमलितानि मात-
र्लास्यात्मना परिणमन्ति जगद्विभूत्यै ॥ १० ॥

जन्तोरपश्चिमतनोस्सति कर्मसाम्ये
निश्शेषपाशपटलच्छिदुरा निमेषात् ।
कल्याणि देशिककटाक्षसमाश्रयेण
कारुण्यतो भवति शाम्भववेधदीक्षा ॥ ११ ॥

मुक्ताविभूषणवती नवविद्रुमाभा
यच्चेतसि स्फुरसि तारकितेव सन्ध्या ।
एकस्स एव भुवनत्रयसुन्दरीणां
कन्दर्पतां व्रजति पञ्चशरीं विनापि ॥ १२ ॥

ये भावयन्त्यमृतवाहिभिरंशुजालै
राप्लाव्यमानभुवनाममृतेश्वरीं त्वाम् ।
ते लङ्घयन्ति ननु मातरलङ्घनीयां
ब्रह्मादिभिस्सुरवरैरपि कालकक्षाम् ॥ १३ ॥

य: स्फाटिकाक्षगुणपुस्तककुण्डिकाढ्यां
व्याख्यानमुद्रितकरां शरदिन्दुशुभ्राम् ।
पद्मासनां च हृदये भवतीमुपास्ते
मातस्स विश्वकवितार्किकचक्रवर्ती ॥ १४ ॥

बर्हावतंसयुतबर्बरकेशपाशां
गुञ्जावलीकृतघनस्तनहारशोभाम् ।
श्यामां प्रवालवसनां शरचापहस्तां
त्वामेव नौमि शबरीं शबरस्य नाथाम् ॥ १५ ॥

अर्धेन किं तव तथा कलितेन मुग्धे
क्रीतं विभो: पुरुषमर्धमिदं शरीरम् ।
आलीजनस्य परिहासवचांसि मन्ये
मन्दस्मितेन तव देवि जडीभवन्ति ॥ १६ ॥

ब्रह्माण्डबुद्बुदकदम्बकसङ्कुलोऽयं
मायोदधिर्विविधतत्त्वतरङ्गमाल: ।
आश्चर्यमम्ब झटिति प्रलयं प्रयाति
त्वद्ध्यानसन्ततिमहाबडवामुखाग्नौ ॥ १७ ॥

दाक्षायणीति कुटिलेति कुहारिणीति
कात्यायनीति कमलेति सरस्वतीति ।
एका सती भगवती परमार्थतोऽपि
संदृश्यसे बहुविधा ननु नर्तकीव ॥ १८ ॥

आनन्दलक्षणमनाहतनाम्नि देशे
नादात्मना परिणतं तव रूपमीशे
प्रत्यङ्मुखेन मनसा परिचीयमानं
शंसन्ति नेत्रसलिलै: पुलकैश्च धन्या: ॥ १९ ॥

त्वं चन्द्रिका शशिनि तिग्मरुचौ रुचिस्त्वं
त्वं चेतनाऽसि पुरुषे पवने बलं त्वम् ।
त्वं स्वादुताऽसि सलिले शिखिनि त्वमूष्मा
निस्सारमेतदखिलं त्वदृते यदि स्यात् ॥ २० ॥

ज्योतींषि यद्दिवि चरन्ति यदन्तरिक्षं
सूते पयांसि यदहिर्धरणीं च धत्ते ।

यद्वाति वायुरनलो यदुदर्चिरास्ते
तत्सर्वमम्ब तव केवलमाज्ञयैव ॥ २१ ॥

सङ्कोचमिच्छसि यदा गिरिजे तदानीं
वाक्तर्कयोस्त्वमसि भूमिरनामरूपा ।
यद्वा विकासमुपयासि यदा तदानीं
त्वन्नामरूपगणनास्सुकरा भवन्ति ॥ २२ ॥

भोगाय देवि भवतीं कृतिनः प्रणम्य
भ्रूकिंकरीकृतसरोजगुहास्सहस्रम् ।
चिन्तामणौ प्रलयकल्पितकेलिशैले
कल्पद्रुमोपवन एव चिरं चरन्ति ॥ २३ ॥

हर्त्री त्वमेव भवसि त्वदधीनमीशे
संसारतापमखिलं दयया पशूनाम् ।
वैकर्तनी किरणसन्ततिरेव नूनं
घर्मं निजं शमयितुं निजया हि दृष्टया ॥ २४ ॥

शक्तिश्शरीरमधिदैवतमन्तरात्मा
ज्ञानं क्रिया करणमासनजालमिच्छा ।
ऐश्वर्यमायतनमावरणानि च त्वं
किं तन्न यद्भवसि देवि शशाङ्कमौलेः ॥ २५ ॥

भूमौ निवृत्तिरुदिता पयसि प्रतिष्ठा
विद्यानले मरुति शान्तिरतीतशान्तिः ।
व्योम्नीति याः किल कलाः कलयन्ति विश्वं
तासां हि दूरतरमम्ब पदं त्वदीयम् ॥ २६ ॥

विद्यां परां कति चिदम्बरमम्ब केचि-
दानन्दमेव कतिचित्कतिचिच्च मायाम् ।
त्वां विश्वमाहुरपरे वयमामनाम
स्साक्षादपारकरुणां गुरुमूर्तिमेव ॥ २७ ॥

यावत्पदं पदसरोजयुगं त्वदीयं
नाङ्गीकरोति हृदयेषु जगच्छरण्ये ।
तावत् विकल्पजटिलाः कुटिलप्रतर्का
स्सर्वेग्रहास्समयिनां प्रलयं न यान्ति ॥ २८ ॥

निर्देवयानपितृयानविहारमेति
कृत्वा मनः करणमण्डलसार्वभौमम् ।
याने निवेश्य तव कारणपञ्चकस्य
पर्वाणि पार्वति नयन्ति निजासनत्वम् ॥ २९ ॥

स्थूलासु मूर्तिषु महीप्रमुखासु मूर्तेः
कस्याश्चनापि तव वैभवमम्ब यस्याः ।
पत्या गिरामपि न शक्यत एव वक्तुं
सापि स्तुता किल मयेति तितीक्षितव्यम् ॥ ३० ॥

कालाग्निकोटिरुचिपुञ्जषडध्वशुद्धा
वाप्लावनेषु भवतीममृतौघवृष्टिम् ।
श्यामां घनस्तनतटां शकलीकृताघां
ध्यायन्ति ये हि जगतां गुरवो भवन्ति ॥ ३१ ॥

कुवलयदलनीलं बर्बरस्निग्धकेशं
पृथुतरकुचभारक्रान्तकान्तावलग्नम् ।
बहुभिरिह किमुक्तैस्स्निग्धरूपं परं न-
स्सकलभुवनमातस्सन्ततं सन्निधत्ताम् ॥ ३२ ॥

इति श्रीकालिदासकृतौ अम्बास्तुतिः सम्पूर्णा ॥

---

(५) सकलजननीस्तवः

अजानन्तो यान्ति क्षयमवशमन्योऽन्यकलहै-
रमी मायाग्रन्थौ तव परिलुठन्तस्समयिनः ।
जगन्मातर्जन्मज्वरभयतमःकौमुदि वयं
नमस्ते कुर्वाणाः शरणमुपयामो भगवतीम् ॥ १ ॥

वचस्तर्कागम्यस्वरसपरमानन्दविभव-
प्रबोधाकाराय द्युतिदलितनीलोत्पलरुचे ।
शिवाद्याराध्याय स्तनभरविनम्राय महते
नमो यस्मै कस्मैचन भवतु मुग्धाय महसे ॥ २ ॥

लुठद्गुञ्जाहारस्तनभरनमन्मध्यलतिका-
मुदञ्चद्धर्माम्भःकणगुणितवक्त्राम्बुजरुचिम् ।
शिवं पार्थत्राणप्रवणमृगयाकारकरुणं
शिवामन्वग्यान्तीं शरणमहमन्वेमि शबरीम् ॥ ३ ॥

मिथः केशाकेशि प्रधननिधनास्तर्कघटना
बहुश्रद्धाभक्तिप्रणतविषयाश्चापि विधयः ।
प्रसीद प्रत्यक्षीभव गिरिसते देहि चरणौ
निरालम्बे चेतः परिलुठति पारिप्लवमिदम् ॥ ४ ॥

शुनां वा वह्नेर्वा खगपरिषदो वा यदशनं
तदा केन क्वेति क्वचिदपि न कश्चित्कलयति ॥
अमुष्मिन्विश्वासं विजहिहि ममाऽह्लाय वपुषि
प्रपद्येथाश्चेतस्सकलजननीमेव शरणम् ॥ ५ ॥

अनाद्यन्ताभेदप्रणयरचितापि प्रणयिनी
शिवस्याजर्यत्वं परिणयविधौ देवि गृहिणी ।
सवित्री भूतानामपि यदुदभूश्शैलतनया
तदेतत्संसारप्रणयनमहानाटकसुखम् ॥ ६ ॥

ब्रुवन्त्येते तत्त्वं भगवति सदन्ये विदुरस-
त्परे मातः प्राहुस्सदसदपि चान्येऽप्यसदसत् ।
चिरेणैतत्सर्वं समभिदधते देवि सुधिय-
स्तदेतत्त्वन्मायाविलसितमशेषं ननु शिवे ॥ ७ ॥

तडित्कोटिज्योतिर्द्युतिदलितषड्ग्रन्थिगहनं
प्रविष्टं स्वाधारे पुनरपि सुधावृष्टिवपुषा ।
किमप्यष्टाविंशत्किरणशकलीभूतमनिशं
भजे धाम श्यामं कुचभरनतं बर्बरकचम् ॥ ८ ॥

चतुष्पत्रान्तःषड्दलपुटभगान्तस्त्रिवलय-
स्फुरद्विद्युद्वह्निद्युमणिनियुताभद्युतियुते ।
षडश्रं भित्त्वादौ दशदलमथ द्वादशदलं
कलाश्रं च द्व्यश्रं गतवति नमस्ते गिरिसुते ॥ ९ ॥

कुलं केचित्प्राहुर्वपुरकुलमन्ये तव बुधाः
परे तत्सम्भेदं समभिदधते कौलमपरे ।

चतुर्णामितेषामुपरि किमपि प्राहुरपरे
महामाये तत्त्वं तव कथममी निश्चिनुमहे ॥ १० ॥

प्रकाशानन्दाभ्यामविदितचरी मध्यपदवीं
प्रविश्यैतद्द्वन्द्वं रविशशिसमाख्यं कवलयन् ।
प्रपद्योर्ध्वं नादं लयदहनभस्मीकृतकुलः
प्रसादात्ते जन्तुश्शिवमकुलमम्ब प्रविशते ॥ ११ ॥

षडध्वारण्यानीं प्रलयशिखकोटिप्रतिरुचा
रुचा भस्मीकृत्य स्वपदकमलप्रह्वशिरसम् ।
वितन्वानः शैवं किमपि वपुरिन्दूपलरुचिः
कुचाभ्यामानम्रश्शिवपुरुषकारो विजयते ॥ १२ ॥

मनुष्यास्तिर्यञ्चो मरुत इति लोकत्रयमिदं
भवाम्भोधौ मग्नं त्रिगुणलहरीकोटिलुठितम् ।
कटाक्षश्चेद्यत्र क्वचन तव मातः करुणया
शरीरी सद्योऽयं व्रजति परमानन्दतनुताम् ॥ १३ ॥

षडाधारावर्तैरपरिमितमन्त्रोर्मिपटलै-
र्वलन्मुद्राफेनैर्बहुविधलसद्दैवतझषैः ।
क्रमस्रोतोभिस्त्वं वहसि परनादामृतनदीं
भवानि प्रत्यग्रा चिदचिदमृताब्धिप्रणयिनी ॥ १४ ॥

महीपाथोवह्निश्वसनवियदात्मेन्दुरविभि-
र्वपुर्भिर्ग्रस्तांशैरपि तव कियानम्ब महिमा ।
अमून्यालोक्यन्ते भगवति न कुत्राप्यणुतरा-
मवस्थां प्राप्तानि त्वयि तु परमव्योमवपुषि ॥ १५ ॥

कलां प्राज्ञां मायां समयमनुभूतिं समरसं
गुरुं पारम्पर्यं विनयमुपदेशं शिवपरम् ।
प्रमाणं निर्वाणं प्रकृतिमतिभूतिं परगुहां
विधिं विद्यामाहुस्सकलजननीमेव मुनयः ॥ १६ ॥

प्रलीने शब्दौघे तदनु विरते विन्दुविभवे
ततस्तत्त्वे चाष्टध्वनिवपुरुपाधिन्युपगते ।
गते शाक्ते पर्वण्यपि कलितचिन्मात्रगहनां
स्वयं व्यक्तां योगी रचयति शिवानन्दतनुताम् ॥ १७ ॥

परानन्दाकारां निरवधिकमैश्वर्यवपुषं
निराघातज्ञानप्रकृतिमनवच्छिन्नकरुणाम् ।
सवित्रीं भूतानां निरतिशयमायास्पदपदां
भवो वा मोक्षो वा भवतु भवतीमेव भजताम् ।। १८ ।।

जगत्काये कृत्वा तदपि हृदये तच्च पुरुषे
पुमांसं बिन्दुस्थं तमपि करुणाख्येऽतिगहने ।
तदेतद् ज्ञानाख्ये तदपि वियदानन्दगहने
महाव्योमाकारस्तदनुभवशीलो विजयते ।। १९ ।।

विधे विद्ये वेद्ये विनयसुलभे वेदगुलिके
विचित्रे विश्वाद्ये विनयसुलभे वेदजननि ।
शिवाज्ञे शीलस्थे शिवपदवदान्ये शिवनिधे
शिवे मातर्मह्यं त्वयि वितर भक्तिं निरुपमाम् ।। २० ।।
विधेर्मुण्डं हृत्वा यदकुरुत पात्रं करतले
हरिं शूलप्रोतं यदगमयदंसाभरणताम् ।
अलञ्चक्रे कण्ठं यदपि गरलेनाम्ब गिरिश-
शिवस्थायाश्शक्तेस्तदिदमखिलं ते विलसितम् ।। २१ ।।

विरिञ्चाख्या मातस्सृजसि हरिसंज्ञा त्वमवसि
त्रिलोकीं रुद्राख्या हरसि निदधासीश्वरदशाम् ।
भवन्ती नादाख्या विहरसि च पाशौघदलना-
त्तदेका नैकासि त्वमसि कृतिभेदैर्गिरिसुते ।। २२ ।।

मुनीनां चेतोभिः प्रमुदितकषायैरपि मना-
गशक्यं सम्प्रष्टुं चकितचकितैरम्ब सततम् ।
श्रुतीनां मूर्धानः प्रकृतिकठिनाः कोमलतले
कथं वा विन्दन्ते पदकिसलये पर्वतसुते ।। २३ ।।

पिता माता भ्राता सुहृदनुचरस्सद्म गृहिणी
वपुः पुत्रः क्षेत्रं धनमपि यदा मां विजहति ।
तदा मे भिन्दाना सपदि भवमोहान्धतमसं
महाज्योत्स्ने मातर्भव करुणया सन्निधिकरी ।। २४ ।।

प्रियङ्गुश्यामाङ्गीमरुणतरवासःकिसलयां
समुन्मीलन्मुक्ताफलकुसुमनेपथ्यसुभगाम् ।

स्तनद्वन्द्वस्फारस्तबकनमितां कल्पलतिकां
सकृद्ध्यायन्तस्त्वामभिदधति सन्तो भगवतीम् ॥ २५ ॥

शिवस्त्वं शक्तिस्त्वं त्वमसि समयस्त्वं समयिनी
त्वमाज्ञा त्वं दीक्षा त्वमयमणिमादिर्गुणगणः ।
अविद्या त्वं विद्या त्वमसि निखिलं तत्त्वमपरं
पृथक्त्वत्तः किंचिद्भगवति न वीक्षामह उमे ॥ २६ ॥

पुरः पश्चादन्तर्बहिरपरिमेयं परिमितं
परं स्थूलं सूक्ष्मं सकलमकलं गुह्यमगुह्म् ।
दवीयो नेदीयस्सदसदिति विश्वं भगवती
सदा पश्यन्त्याख्यां वहसि भुवनक्षोभजननीम् ॥ २७ ॥

त्वाऽसौ जानीते रचयति भवत्यैव सततं
त्वयैवेच्छत्यम्ब त्वमसि तनवोऽप्यस्य विहिताः ।
जगत्साम्यं शम्भोर्वहसि परमव्योमवपुष-
स्तथाप्यर्धं भूत्वा विहरसि हरस्येति किमिदम् ॥ २८ ॥

मयखाः पृष्णीव ज्वलन इव तद्दीप्तिकणिकाः

स्फुटं जानानोऽपि प्रभवति न देही रहयितुं
शरीराहङ्कारं तव जननि बाह्यं गिरिसुते ॥ ३२ ॥

असङ्ख्यैः प्राचीनैर्जननि जननैः कर्मनिलयात्-
सकृज्जन्मन्यते गुरुवपुषमासाद्य वपुषि ।
तवाप्याज्ञां शैवीं शिवतनुमपि त्वां विदितवा-
न्नयेयं त्वत्पूजास्तुतिविरचनेनैव दिवसान् ॥ ३३ ॥

भुवि पयसि कृशानौ मारुते खे शशाङ्के
सवितरि यजमानेऽप्यष्टधाशक्तिरेका ।
वहसि कुचभराभ्यां या विनम्राऽसि विश्वं
सकलजननि सा त्वं पाहि मामित्यवाच्यम् ॥ ३४ ॥

यत्षट्पत्रं कमलमुदितं तस्य या कर्णिकाख्या
योनिस्तस्याः प्रथितमुदरे तत्तदोङ्कारपीठम् ।
तस्याप्यन्तः कुचभरनतां कुण्डलीति प्रसिद्धां
श्यामाकारां सकलजननीं चेतसा चिन्तयामि ॥ ३५ ॥

इति श्रीमत्कविराजराजमकुटरत्नराजितचरणारुणराजीवस्य
राजराजेश्वरीकरुणाकटाक्षलब्धनिखिलानवद्यविद्यस्य
तत्रभवतः श्रीकालिदासस्य कृतिषु[1]
श्रीसकलजननीस्तवः
सम्पूर्णः ॥

---

१. सौन्दर्यलहरी के टीकाकार श्रीकामेश्वरसूरि ने पञ्चस्तवी को आचार्य भगवत्पादकृत माना है तथा श्रीलक्ष्मीधर ने कालिदास कृत । कैवल्याश्रम ने इसे धर्माचार्य की रचना माना है । ये महाराज समुद्रगुप्त के धर्माध्यक्ष हरिषेण कालिदास हो सकते हैं ।

परिशिष्ट २

नन्दिकेश्वर-काशिका

उपमन्युकृतटीकासंवलिता

नृत्यावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्त्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥ १ ॥

नमः शिवाय देवाय सर्वज्ञाय महात्मने ।
यस्योन्मेषनिमेषाभ्यां व्यक्ताव्यक्तमिदं जगत् ॥ १ ॥
गुरुं शिवं कुमारञ्च शिवतत्त्वविशारदम् ।
प्रणम्य नन्दिकेशादीन् शिवभक्तान् मुहुर्मुहुः ॥ २ ॥
काशिकामादिसूत्राणां नन्दिकेशकृतां शुभाम् ।
लोकोपकारिणीं दिव्यां व्याकरोमि यथामति ॥ ३ ॥

इह खलु सकललोकनायकः परमेश्वरः परमशिवः सनकसनन्दन-सनत्कुमारादीन् श्रोतॄन् नन्दिकेशपतञ्जलिव्याघ्रपादवसिष्ठादीनुद्धर्त्तुकामो डमरुनिनादव्याजेन चतुर्दशसूत्र्यात्मकं तत्त्वमुपदिदेश । तदनु ते सर्वे मुनीन्द्रवर्याश्चिरकालमाश्रितानामस्माकं तत्त्वं चतुर्दशसूत्रात्मकमुपदिदेशेति मत्वा अस्य सूत्रजालस्य तत्त्वार्थं नन्दिकेश्वरो जानातीति नन्दिकेश्वरं प्रणिपत्य पृष्टवन्तः । ततस्तेषु पृष्टवत्सु स षड्विंशतिकारिकारूपेण तत्त्वं सूत्राणामुपदेष्टुमिच्छन्निदमाचचक्षे—ःनृत्यावसानेः इति । अहमिति शेषः । 'नटराजराज' इत्यनेन मङ्गलानि दर्शितानि । विश्वरूपविलासवैचित्र्यचमत्कारप्रवीणत्वान्नटराजराजः, ताण्डवाख्यरासमात्रविलासवैचित्र्यचमत्कारप्रवीणत्वस्य त्वन्यत्र नटादावपि सत्त्वात् । स त्वात्मत्त्वं वागाद्यगोचर इति ज्ञापनार्थं ढक्कानिनादव्याजेन सनकादीनुद्धर्त्तुकामो नवपञ्चवारं चतुर्दशवारं स्वान्तर्गतमात्मतत्त्वं प्रकटयितुं नृत्यावसाने ननाद नादितवान् । अहं तदेतद् विततनिनादोद्भूतवर्णात्मकमाद्यमतिरहस्यमेतच्छिवसूत्रजालं शिवसम्बन्धिसूत्रसमूहं कल्याणरूपसूत्रसमूहं वा विमर्शे विचार्य स्फुटीकरोमीत्यर्थः । ('विमर्शे' इति छान्दसं बोध्यम्) ॥ १ ॥

अत्र सर्वत्र सूत्रेषु अन्त्यवर्णचतुर्दशम् ।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ॥ २ ॥

अनुबन्धाः पाणिन्याद्युद्देश्यका एवेत्याह—ःअत्रेतिः । एष्वित्यादिरर्थः । अन्त्यं वर्णेति वा पाठः । उभयथापि बहुव्रीहिः । कदम्बमन्यपदार्थः समासान्तः । चतुर्दशेति वा पाठः । तदा तत्पुरुषः । द्व्येकयोरितिवच्चतुर्दशेति प्रयोगः । केषुचित् पुस्तकेषु 'अन्त्यवर्णं चतुर्दशक'मिति पाठः । धात्वर्थंधातुमूलकशब्दशास्त्र-

प्रवृत्त्यर्थमित्यर्थः, अन्त्यवर्णजालं शब्द इति न्यायेन। तथा चोक्तमिन्द्रेण–'अन्त्यवर्णसमुद्भूता धातवः परिकीर्त्तिता' इति ॥ २ ॥

अ इ उ ण् ॥ १ ॥

अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्ववस्तुषु।
चित्कलामिं समाश्रित्य जगद्रूप उणीश्वरः ॥ ३ ॥

तत्राद्येन सूत्रेण सर्ववर्णानां समस्तभुवनाञ्च समुद्भवरूपं स्वात्मतत्त्वमुपदिष्टमित्याह—०अकारो ब्रह्मेति०। अः परमेश्वरो निर्गुणः इं मायामाश्रित्य उः व्यापकः सगुणः ईश्वरः ण् आसीत् इति सूत्रार्थः सूचितः। [सर्ववस्तुषु परापश्यन्तीमध्यमावैखर्यादिषु इं चित्कलामिमित्यत्र गायत्रीमिं चेतिवदीकारो बोध्यः। अत्र ईकारस्तु सूत्रे नोदितः इकार एव प्रकटितः। सर्गसम्भवकाले अ, इ, उ, ऋ, ऌ, इति वर्णपञ्चकमेव सर्वेषामेकोनपञ्चाशदक्षराणां भूतपञ्चकानां पञ्चवर्गाणां क्रमेण योनिरिति]। अत्र प्रमाणम्—'असद्वा इदमग्र आसीत्ततो वै सदजायत' इति श्रुतिः। असद् ब्रह्म वै निश्चयेन अग्रे सृष्टेः पूर्वमिदमक्षरात्मकमासीत्। ततोऽक्षरात् असतो वै सत् सगुणमजायत जातमित्यर्थः। तदुक्तं, गीतायाम्, 'अक्षराणामकारोऽस्मी'ति ॥ ३ ॥

अकारः सर्ववर्णाग्र्यः प्रकाशः परमेश्वरः।
आद्यमन्त्येन संयोगादहमित्येव जायते ॥ ४ ॥

अत एवाह—

जगत् स्रष्टुमभूदिच्छा यदा ह्यासीत्तदाभवत् ।
कामबीजमिति प्राहुर्मुनयो वेदपारगाः ॥ ८ ॥
अकारो ज्ञप्तिमात्रं स्यादिकारश्चित्कला मता ।
उकारो विष्णुरित्याहुर्व्यापकत्वान्महेश्वरः ॥ ९ ॥

तत्र सर्वत्रेकारस्यैव स्वतन्त्रतामाह— ॐअकारमितिॐ ॥ ७ ॥
ॐजगत् स्रष्टुमितिॐ । उक्तं च—
'स्वप्रकाशपरमात्मवस्तुनो दृश्यमानजगतः सिसृक्षया ।
कामतः परशिवप्रकाशितं कामबीजमिदमेव निश्चितम् ॥' इति,

'बीजं बिन्दुद्वयारूढं सार्धयोनिस्वरूपकम् ।
महाकामकलारूपमात्मानं चिन्तयेत् प्रिये ॥'

इति च ॥ ८ ॥

उक्तमेव द्रढ़यति—अकार इति । उकार इति उ व्यापकत्वेन ण् ईश्वर आसीदित्यर्थके उणीश्वरः इत्यत्रेति भावः ॥ ९ ॥

ऋ ऌ क् ॥ २ ॥

ऋ ऌ क् सर्वेश्वरो मायां मनोवृत्तिमदर्शयत् ।
तामेव वृत्तिमाश्रित्य जगद्रूपमजीजनत् ॥ १० ॥

ननु सर्ववेदान्तेषु परमेश्वर एक इति निश्चितत्वान्मायामीं चित्कलां समाश्रित्य जगद्रूपोऽभूदित्युक्तेऽद्वैतहानिर्जायेतेत्याशङ्क्याह—ऋ ऌगिति । ऋ परमेश्वरः ऌ मायाख्यां मनोवृत्तिं क् अदर्शयत्, तामेवाश्रित्य स्वेच्छया जगज्जनयामासेत्यर्थः । ऋ परमेश्वर इत्यत्र 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्' इति श्रुतिः प्रमाणम् । तं तत्पदार्थं परं ब्रह्म ऋ सत्यमित्यर्थः । श्रुत्यन्तरमपि— 'सोऽकामयत बहु स्यां प्रजायेय' इति । श्रीतन्त्रेऽपि—'मत्तो ह्यभून्मनोरूपं ऌकारः परमेश्वरि' इति । ऋऌवर्णौ यथा तादात्म्यमापन्नौ तथेत्यर्थः ॥ १० ॥

वृत्तिवृत्तिमतोरत्र भेदलेशो न विद्यते ।
चन्द्रचन्द्रिकयोर्यद्वद् यथा वागर्थयोरपि ॥ ११ ॥

स्वेच्छया स्वस्य चिच्छक्तौ विश्वमुन्मीलयत्यसौ ।
वर्णानां मध्यमं क्लीबमृऌवर्णद्वयं विदुः ॥ १२ ॥

तदाह—भेदलेश इति । वास्तव इत्यर्थः ॥ ११-१२ ॥

ए ओ ङ् ॥ ३ ॥

ए ओ ङ् मायेश्वरात्म्यैक्यविज्ञानं सर्ववस्तुषु ।
साक्षित्वात् सर्वभूतानां स एक इति निश्चितम् ॥ १३ ॥

ननु 'जनयामास' इत्युक्ते जन्यजनकभावेऽद्वैतहानिः स्यादित्याशङ्क्य 'तत् सृष्ट्वा तदेवानुप्राविशदि'ति श्रुतिमाश्रित्याह—एवोङ्मायेश्वरेति। जन्यजनकत्वं च स्वस्यैव तद्रूपेण वर्तमानत्वादिति नाद्वैतहानिः। अकारोकाराभ्यां निष्पन्नप्रणवरूपेणौकारेण सगुणनिर्गुणयोरैक्ये बोधिते तेनैव दृष्टान्तेन सर्वत्रैक्यबुद्धौ द्वैतनिरासो ध्वनितः। समष्टिव्यष्टिभेदेन पूर्ववर्णयुतद्वितीयस्य तद्युततृतीयस्य च समन्वयबोधकमिदं सूत्रम्। अ अक्षरात्मकः इ मायायुक्तः सन् प्रज्ञानस्वरूपः प्रज्ञानात्मा [सर्ववस्तूनामेकत्वात् अद्वैतोपपत्तिः, न नानात्वं जन्यजनकत्वं च।] स्वयं प्रविश्यत तद्रूपेण वर्त्तत इत्यर्थः। वटबीजन्यायेन च पूर्वसूत्रद्वयजनितवर्णपञ्चकमेव सकलजगत् कारणमिति प्रागुक्तम्। उत्तरसूत्रवर्णानामपि तस्मादेव सम्भवः। समष्टिव्यष्टिभेदेषु पूर्ववर्णयुतद्वितीयस्य पूर्ववर्णयुततृतीयस्य च समन्वयबोधकमिदं सूत्रम्। समन्वयबोधनमप्येकत्वेनोक्तम्। अत्राप्यपरत्वे सर्ववेदसम्मतत्वं च। तथा च सनकदक्षिणामूर्त्तिसंवादमहावाक्यविवरणे—

'श्रुणु त्वं सावधानेन चतुर्णामपि साम्यता।
वेदानां च महाभाग चतुष्काणामिहोच्यते॥ १॥

ब्रह्मशब्देन यद्वस्तु तत्त्वज्ञानमितीरितम्।
प्रज्ञानं ब्रह्म यस्माद्धि तस्माद् ब्रह्मास्म्यहं ततः॥ २॥

तद् ब्रह्म सर्वसाक्षीति तत्त्वमस्येव तत्त्वतः।
अन्यत्ववारणत्वायाऽयमात्मेत्यपि वर्ण्यते'॥ ३॥

इति॥ १३॥

ऐ औ च्॥ ४॥

ऐ औ च् ब्रह्मस्वरूपः सन् जगत् स्वान्तर्गतं ततः।
इच्छया विस्तरं कर्त्तुमाविरासीन्महामुनिः॥ १४॥

स्वात्मभूतस्य परमेश्वरस्य जगत्कारणत्वं कथमित्याशङ्क्याह–ऐ औजिति। ततः स्वान्तर्गतं जगद्विस्तारयितुमिच्छुः ऐ ज्ञानशक्तियुक्त इति अतः पूर्वसूत्रगत एव सः। अकारेकारदीर्घयोगस्यैव ऐकारत्वमेकत्वञ्च। सम्प्रज्ञानस्वरूपपरमेश्वरो यः स पूर्वसूत्रगत एव, अकारदीर्घस्य उकारदीर्घस्यैव योगे औकारत्वम्, यः स

इति ज्ञानोत्तमे। एवं तत्तत्समुदायानां त्रयोदशवर्णाच्छिवादिप्रकृत्यन्तानामुद्भवः। प्रकृतिपुरुषविवेकमुत्तरत्र कथयत्यस्मिन् सूत्रे उपहारत्वेन पठितम्। अत्र ह्रस्व-दीर्घप्रभेदाच्चतुर्दशस्वराणामेव संकीर्तनं चतुर्दशभुवन-चतुर्दशचक्रचतुर्दशप्रकारा-णामिति निष्कर्षः। तदुक्तं शिवगौरीसंवादे महामन्त्रतत्त्वप्रकाशिन्याम्—

'तव मन्त्रं महेशानि मम रूपं त्वमेव हि।
चतुर्दशात्मकं चक्रं स्वरचक्रमितीरितम्॥
त्रयोदशात्मकं तुर्यमावयोर्मन्त्रमम्बिके।
उच्छूनकाले बिन्द्वात्मा तस्मादक्षरसम्भवः॥
बिन्दुस्फोटनमात्रेण वर्णानां च समुद्भवः।
तस्मादाकाशमुख्यानि भूतानि समजायत॥
बिन्दुः श्रीचक्रराजस्य परब्रह्मात्मकस्त्विति।
चतुर्दशात्मकः पश्चाच्चक्राकारेण सम्भवः॥
उत्पन्नभुवनान्यत्र चतुर्दश चतुर्दशे'ति॥ १४॥

ह य व र ट्॥ ५॥

भूतपञ्चकमेतस्माद्ध-य-व-र-णमहेश्वरात्।
व्योमवाय्वम्बुवह्न्याख्यभूतान्यासीत् स एव हि॥ १५॥

तत आत्मनः सकाशादाकाशादिभूतसम्भवमाह—भूतपञ्चकमिति। स एवेति। परमेश्वर एवेत्यर्थः॥ १५॥

हकाराद्व्योमसंज्ञं च यकाराद्वायुरुच्यते।
रकाराद्वह्निस्तोयं तु वकारादिति सैव वाक्॥ १६॥

हकारादित्यादि। 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, आकाशा-द्वायुः वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी' इति श्रुतिः॥ १६॥

ल ण्॥ ६॥

आधारभूतं भूतानामन्नादीनां च कारणम्।
अन्नाद्रेतस्ततो जीवः कारणत्वाल्लणीरितम्॥ १७॥

एतस्मात् परमेश्वराद् भूतपञ्चकमाकाशादिकं प्रपञ्चकारणमासीदित्युक्तम्, तत्र आकाशादिभूतचतुष्टयमेवोक्तम्, न पृथिवीत्याकांक्षायामान—आधारेति। भूतानां प्राणिजातानामुद्भिज्जस्वेदज-जरायुजाण्डजादीनां प्रधानाधारत्वादाधार-भूता पृथिवी पुनश्चान्नपानादीनां कारणत्वात् प्रत्येकत्वेन लणित्युदीरितमित्यर्थः, अन्नाद्रेत इति न्यायात्॥ १७॥

ञ म ङ ण न म् ।। ७ ।।

शब्दस्पर्शौ रूपरसगन्धाश्च ञ-म-ङ-ण-न-म् ।
व्योमादीनां गुणा ह्येते जानीयात् सर्ववस्तुषु ।। १८ ।।

ततः पृथिव्यादीनां कारणत्वेन स्थितानां तन्मात्राणामुत्पत्तिक्रममाह—शब्देति । व्योमादीनामिति । व्योमादीनां गुणानेककारणानुत्पत्तिक्रमे तान् जानीयात् । सर्ववस्तुष्विति । अत्र केषांचिद् ग्रन्थे अकारादिक्षकारान्ताः षट्त्रिंशत्तत्त्वमयाः, कतिचित्तन्त्रराजादिग्रन्थे पञ्चभूतक्रमेण लिपिप्रकारेण । एवमन्यत्र बीजनिर्णयभेदा बह्वः सन्ति, अत्र तु तन्त्रोक्तप्रकारेणोद्घाटितम् ।

'पञ्चवर्गेष्वन्तिमार्णाः शब्दस्पर्शादयो गुणाः ।'

इति वचनात् । सर्वजगत्कारणभूतस्य वर्णरूपपुरुषस्य सर्वेषां चेति व्योमादिगुणा इत्यर्थः ।। १८ ।।

झ भ ञ् ।। ८ ।।

वाक्पाणी च झ-भ-ञासीद्विराड्रूपचिदात्मनः ।
सर्वजन्तुषु विज्ञेयं स्थावरादौ न विद्यते ।।
वर्गाणां तुर्यवर्णा ये कर्मेन्द्रियमया हि ते ।। १९ ।।

घ ढ ध ष् ।। ९ ।।

घढधष् सर्वभूतानां पादपायू उपस्थकः ।
कर्मेन्द्रियगणा ह्येते जाता हि परमार्थतः ।। २० ।।

ततः सूत्राभ्यां कर्मेन्द्रियवर्गमुद्धाटयति—वाक्पाणी चेति । विराड्रूपस्य शिवस्य प्राणिजातस्य च झकारभकारौ स्थावरादिषु विना विराड्रूपं विज्ञेयमित्यर्थः । अथ क्रमप्राप्तं पादादिकमाह—घढधषिति । परमार्थत इति । परमशिवसकाशात् इमे कर्मेन्द्रियगणाः सर्वजन्तूनां पादपायूपस्थाः घढधवर्णा जाता इत्यर्थः ।। १९-२० ।।

ज ब ग ड द श् ।। १० ।।

श्रोत्रत्वङ्नयनघ्राणजिह्वाधीन्द्रियपञ्चकम् ।
सर्वेषामपि जन्तूनामीरितं ज-ब-ग-ड-द-श् ।। २१ ।।

अथ क्रमप्राप्तं ज्ञानेन्द्रियसम्भवमाह— श्रोत्रेति ।

'वर्गाणां मध्यवर्णोत्थो ज्ञानेन्द्रियगणः स्मृतः' ।

इति वचनशासनाज्जबगडदवर्णसमूहो ज्ञानेन्द्रियगण इति तस्य सर्वत्रस्थस्यैव ज्ञानेन्द्रियगणः समुत्पन्नः इति सर्वत्र सर्वेषां प्राणिजातानामेते वर्णा ज्ञानेन्द्रियाणां जनका इति वा ज्ञातव्यमित्यर्थः ।। २१ ।।

ख फ छ ठ थ च ट त व् ॥ ११ ॥

प्राणादिपञ्चकं चैव मनो बुद्धिरहङ्कृतिः ।
बभूव कारणत्वेन ख-फ-छ-ठ-थ-च-ट-त व् ॥ २२ ॥
वर्गद्वितीयवर्णोत्थाः प्राणाद्याः पञ्च वायवः ।
मध्यवर्गत्रयाज्जाता अन्तःकरणवृत्तयः ॥ २३ ॥

ततः प्राणादिपञ्चकमनोबुद्धयहङ्कारा: समुन्मील्यन्ते—प्राणादीति ॥२२॥

वर्गेति । एतैरष्टवर्णैः प्राणादिपञ्चकं मनोबुद्धयहङ्कृतयश्च जगतां कारणत्वेन सम्भूता इत्यर्थः ॥ २३ ॥

क प य् ॥ १२ ॥

प्रकृतिं पुरुषञ्चैव सर्वेषामेव सम्मतम् ।
सम्भूतमिति विज्ञेयं क-प-य् स्यादिति निश्चितम् ॥ २४ ॥

ततः सर्वप्राणिकारणत्वेनाद्यन्तवर्गद्वयाद्यक्षरग्रहणेन सम्पुटीभावं प्रकृतिपुरुषाभ्यां प्रकाशयति—प्रकृतिमिति । ककारपकारजातौ प्रकृतिपुरुषावित्यर्थः ॥२४॥

श ष स र् ॥ १३ ॥

सत्त्वं रजस्तम इति गुणानां त्रितयं पुरा ।
समाश्रित्य महादेवः श-ष-स-र् क्रीडति प्रभुः ॥ २५ ॥
शकाराद्राजसोद्भूतिः षकारात्तामसोद्भवः ।
सकारात् सत्त्वसम्भूतिरिति त्रिगुणसम्भवः । २६ ॥

तत्रावस्थात्रयं निरूपयति—सत्त्वमित्यादि । पुरा सृष्टेः प्राक् शषसवर्णसम्भूतान् सत्त्वरजस्तमोगुणानाश्रित्य परमशिवः सर्वभूतेषु क्रीडतीत्यर्थः॥२५-२६॥

ह ल् ॥ १४ ॥

तत्त्वातीतः परः साक्षी सर्वानुग्रहविग्रहः ।
अहमात्मा परो हल् स्यामिति शम्भुस्तिरोदधे ॥ २७ ॥

इति नन्दिकेश्वरकृता काशिका समाप्ता ॥

सर्वतत्त्वजनकः स्वयं तत्त्वातीत इति ज्ञापनार्थमेतत् सूत्रं चकारेत्याह—तत्त्वातीत इति । सर्वानुग्रहः साक्षी तत्त्वातीतो हल् स्यामिति ढक्कानिनादव्याजेन सर्वेषां मुनिजनानां तत्त्वमुपदिशन् तिरोदधे इत्यर्थः । हकारः शिववर्णः स्यादिति शैवागमस्थिति'रिति शिवम् ॥ २७ ॥

इति आदिसूत्रनन्दिकेश्वरकाशिकायास्तत्त्वविमर्शिन्युपमन्युकृता टीका सम्पूर्णा ॥

परिशिष्ट ३

वर्णोद्धारतन्त्रोक्त मात्रिकाओं की ध्यान-सम्बन्धी आकृतियाँ

केतकीपुष्पगर्भाभां द्विभुजां हंसलोचनाम् ।
शुक्लपट्टाम्बरधरां पद्ममाल्यविभूषिताम् ॥
चतुर्वर्गप्रदां नित्यं नित्यानन्दमयीं पराम् ।
वराभयकरां देवीं नागपाशसमन्विताम् ॥
एवं ध्यात्वा अकारं तु तन्मन्त्रं दशधा जपेत् ॥ अ ॥

ध्यानमस्याः प्रवक्ष्यामि षड्भुजां रक्तलोचनाम् ।
रत्न-कङ्कण-केयूर-हारोज्ज्वलकलेवराम् ॥
सिद्धां सिद्धिप्रदां सौम्यां सिद्धगन्धर्वसेविताम् ।
एवं ध्यात्वा सुरश्रेष्ठां तन्मन्त्रं दशधा जपेत् ॥ आ ॥

धूम्रवर्णां महारौद्रीं पीताम्बरयुतां पराम् ।
कामदां सिद्धिदां सौम्यां नित्योत्साहविवर्द्धिनीम् ॥
चतुर्भुजान्तु वरदां हरिचन्दनभूषिताम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥ इ ॥

चतुर्भुजां रक्तवर्णां रक्तपुष्पोपशोभिताम् ।
चारुचन्दनदिग्धाङ्गीं रक्तपङ्कजलोचनाम् ।
रक्तचीरपरीधानां धर्मकामार्थमोक्षदाम् ॥
एवं ध्यात्वा सुरश्रेष्ठां तन्मन्त्रं दशधा जपेत् ॥ ई ॥

पीतवर्णां त्रिनयनां पिताम्बरधरां पराम् ।
द्विभुजां जटिलां भीमां सर्वसिद्धिप्रदायिनीम् ।
एवं ध्यात्वा सुरश्रेष्ठां तन्मन्त्रं दशधा जपेत् ॥ उ ॥

द्विभुजां शुक्लवर्णां च जटामुकुटशोभिताम् ।
शुल्कमाल्याम्बरधरां चारुचन्दनभूषिताम् ॥
चतुर्वर्गप्रदां नित्यां रक्तपङ्कजलोचनाम् ।
एवं ध्यात्वा तु तन्मन्त्रं दशधा जपमाचरेत् ॥ ऊ ॥

षड्भुजां नीलवर्णां च नीलाम्बरधरां पराम् ।
नानालङ्कारभूषाढ्यां सर्वालङ्कृतमस्तकाम् ।
भक्तिप्रदां भगवतीं भोगमोक्षप्रदायिनीम् ॥
एवं ध्यात्वा सुरश्रेष्ठां तन्मन्त्रं दशधा जपेत् ॥ ऋ ॥

ध्यानमस्याः प्रवक्ष्यामि द्विभुजां पद्मलोचनाम् ।
सन्तप्तस्वर्णवर्णाभां सर्वालङ्कारभूषिताम् ॥
रक्तपद्मेक्षणां देवीं रत्नहार-विभूषिताम् ।
एवं ध्यात्वा सुरश्रेष्ठां तन्मन्त्रं दशधा जपेत् ॥ ॠ ॥

स्वर्णचम्पकवर्णाभ्च स्वर्णालङ्कारविग्रहाम् ।
चतुर्भुजां त्रिनयनां रक्तचन्दनचर्चिताम् ॥
प्रणमामि सदा देवीं धर्मकामार्थमोक्षदाम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥ ऌ ॥

ध्यानमस्याः प्रवक्ष्यामि पीतवर्णां चतुर्भुजाम् ।
पीताम्बरपरीधानां नानालङ्कारमस्तकाम् ॥
विचित्रमाल्याभरणां देवदानवसेविताम् ।
चतुर्वर्गप्रदां नित्यां नित्योत्साहविवर्द्धिनीम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥ ॡ ॥

रक्ताम्बरपरीधानां षड्भुजां रक्तलोचनाम् ।
विचित्राभरणां नित्यां चतुर्वर्गप्रदायिनीम् ।
ईषद्धास्यमुखीं सौम्यां देवगन्धर्वसेविताम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥ ए ॥

विचित्ररूपिणीं देवीं विचित्राम्बरधारिणीम् ।
विचित्रमाल्याभरणां चतुर्बाहुसमन्विताम् ॥
नानालङ्कारसंयुक्तां चतुर्वर्गफलप्रदाम् ।
देवदानवगन्धर्वैः सेवितां मोक्षकाङ्क्षिभिः ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥ ऐ ॥

रत्नालङ्कारसंयुक्तां पद्मरागप्रभां शुभाम् ॥
शरत्पूर्णेन्दुवदनां विचित्रवसनान्विताम् ॥
चतुर्भुजां त्रिनयनां स्मेरास्यां नीलकुन्तलाम् ।

विद्युद्दामसमानाङ्गीं मुक्तापङ्क्तिस्रजं भजे ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥ ओ ॥

चतुर्भुजां त्रिनयनां जटामुकुटमण्डिताम् ।
श्वेत-रोहित-पीतादि-पुष्पहारोपशोभिताम् ।
सदास्मेरमुखीं सौम्यां चतुर्वर्गप्रदायिनीम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥ औ ॥

जपादाडिमपुष्पाभां द्विभुजां रक्तलोचनाम् ।
रक्ताम्बरपरीधानां रक्तालङ्कारभूषिताम् ।
चतुर्वर्गप्रदां सौम्यां वरदां नागशेखराम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥ अं ॥

सन्तप्तहेमवर्णाभां सर्वालङ्कारभूषिताम् ।
रत्नयज्ञोपवीतां च रत्नकङ्कणराजिताम् ॥
पूर्णेन्दुवदनां सौम्यां तुरीयकरसंयुताम् ॥
चन्द्रसूर्याग्निरूपेण नयनत्रितयान्विताम् ।
साधकाभीष्टदां नित्यां धर्मकामार्थमोक्षदाम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥ अः ॥

जपायावकसिन्दूरसदृशीं कामिनीं पराम् ।
चतुर्भुजां त्रिनेत्रां बाहुवल्लीविराजिताम् ॥
कदम्बकोरकाकार-स्तनयुग्म-विराजिताम् ।
रत्नकङ्कण-केयूर-हार-नूपुर-भूषिताम् ।
एवं ककारं ध्यात्वा तु तन्मन्त्रं दशधा जपेत् ॥ क ॥

बन्धूकपुष्पसङ्काशां रत्नालङ्कारभूषिताम् ।
वराभयकरां नित्यामीषद्धास्यमुखीं पराम् ।
एवं ध्यात्वा खकारं तु तन्मन्त्रं दशधा जपेत् ॥ ख ॥

दाडिमपुष्पशङ्काशां चतुर्बाहुसमन्विताम् ॥
रक्ताम्बरधरां नित्यां रक्तालङ्कारभूषिताम् ।
एवं ध्यात्वा गकारं तु तन्मन्त्रं दशधा जपेत् ॥ ग ॥

मालतीपुष्पवर्णाभां षड्भुजां रक्तलोचनाम् ।
शुल्काम्बरपरीधानां शुल्कमाल्यविभूषिताम् ।

पूर्णचन्द्रनिभां देवीं विकसत्पङ्कजेक्षणाम् ।
सुन्दरीं षोडशभुजां धर्मकामार्थमोक्षदाम् ।
एवं ध्यात्वा ठकारं तु तन्मन्त्रं दशधा जपेत् ॥ ठ ॥

जपासिन्दूरसङ्काशां वराभयकरां पराम् ।
त्रिनेत्रां वरदां नित्यां परमोक्षप्रदायिनीम् ।
एवं ध्यात्वा डकारं तु तन्मन्त्रं दशधा जपेत् ॥ ड ॥

रक्तोत्पलनिभां रम्यां रक्तपङ्कजलोचनाम् ।
अष्टादशभुजां भीमां महामोक्षप्रदायिनीम् ।
एवं ध्यात्वा ढकारं तु तन्मन्त्रं दशधा जपेत् ॥ ढ ॥

द्विभुजां वरदां वन्द्यां भक्ताभीष्टप्रदायिनीम् ।
राजीवलोचनां नित्यां धर्मकामार्थ-मोक्षदाम् ॥
एवं ध्यात्वा णकारं तु तन्मन्त्रं दशधा जपेत् ॥ ण ॥

चतुर्भुजां महाशान्तां महामोक्षप्रदायिनीम् ॥
सदा षोडशवर्षीयां रक्ताम्बरधरां पराम् ॥
नानालङ्कारभूषां वा सर्वसिद्धिप्रदायिनीम् ।
एवं ध्यात्वा तकारं तु तन्मन्त्रं दशधा जपेत् ॥ त ॥

नीलवर्णां त्रिनयनां षड्भुजां वरदां पराम् ।
पीतवस्त्रपरीधानां सदा सिद्धिप्रदायिनीम् ॥
एवं ध्यात्वा थकारं तु तन्मन्त्रं दशधा जपेत् ॥ थ ॥

चतुर्भुजां पीतवस्त्रां नवयौवन-संस्थिताम् ।
अनेक-रत्नघटित-हारनूपुर-शोभिताम् ।
एवं ध्यात्वा दकारं तु तन्मन्त्रं दशधा जपेत् ॥ द ॥

षड्भुजां मेघवर्णां च रक्ताम्बरधरां पराम् ।
वरदां शुभदां रम्यां चतुर्वर्गप्रदायिनीम् ॥
एवं ध्यात्वा धकारं तन्मन्त्रं दशधा जपेत् ॥ ध ॥

दलिताञ्जनवर्णाभां ललज्जिह्वां सुलोचनाम् ।
चतुर्भुजां चकोराक्षीं चारुचन्दनचर्चिताम् ॥
कृष्णाम्बरपरीधानामीषद्धास्यमुखीं सदा ।
एवं ध्यात्वा नकारं तु तन्मन्त्रं दशधा जपेत् ॥ न ॥

विचित्रवसनां देवी द्विभुजां पङ्कजेक्षणाम् ।
रक्तचन्दनलिप्ताङ्गीं पद्ममालाविभूषिताम् ॥
मणिरत्नादिकेयूरहारकेयूरविग्रहाम् ।
चतुर्वर्गप्रदां नित्यां नित्यानन्दमयीं पराम् ॥
एवं ध्यात्वा पकारं तु तन्मन्त्रं दशधा जपेत् ॥ प ॥

प्रलयाम्बुदवर्णाभां ललज्जिह्वां चतुर्भुजाम् ।
भक्ताभयप्रदां नित्यां नानालङ्कारभूषिताम् ।
एवं ध्यात्वा फकारं तु तन्मन्त्रं दशधा जपेत् ॥ फ ॥

नीलवर्णां त्रिनयनां नीलम्बरधरां पराम् ।
नागहारोज्ज्वलां देवीं द्विभुजां पद्मलोचनाम् ॥
एवं ध्यात्वा बकारं तु तन्मन्त्रं दशधा जपेत् ॥ ब ॥

तडित्प्रभां महादेवीं नागकङ्कणशोभिताम् ।
चतुर्वर्गप्रदां देवीं साधकाभीष्टसिद्धिदाम् ॥
एवं ध्यात्वा भकारं तु तन्मन्त्रं दशधा जपेत् ॥ भ ॥

कृष्णां दशभुजां भीमां, पीयलोहितलोचनाम् ।
कृष्णाम्बरधरां नित्यां धर्मकामार्थमोक्षदाम् ॥
एवं ध्यात्वा मकारं तु तन्मन्त्रं दशधा जपेत् ॥ म ॥

धूम्रवर्णां महारौद्रीं षड्भुजां रक्तलोचनाम् ।
रक्ताम्बरपरीधानां नानालङ्कार-भूषिताम् ।
महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिनीम् ॥
एवं ध्यात्वा यकारं तु तन्मन्त्रं दशधा जपेत् ॥ य ॥

ललज्जिह्वां महारौद्रीं रक्तास्यां रक्तलोचनाम् ।
रक्तवर्णामष्टभुजां रक्तपुष्पोपशोभिताम् ।
रक्तमाल्याम्बरधरां रक्तालङ्कारभूषिताम् ॥
महामोक्षप्रदां नित्यामष्टसिद्धिप्रदायिकाम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥ र ॥

चतुर्भुजां पीतवस्त्रां रक्तपङ्कजलोचनाम् ।
सर्वदा वरदां भीमां सर्वालङ्कारभूषिताम् ॥
योगीन्द्रसेवितां नित्यां योगिनीं योगरूपिणीम् ।

चतुर्वर्गप्रदां देवीं नागहारोपशोभिताम् ।
एवं ध्यात्वा लकारं तु तन्मन्त्रं दशधा जपेत् ॥ ल ॥

कुन्दपुष्पप्रभां देवीं द्विभुजां पङ्कजेक्षणाम् ।
शुल्कमाल्याम्बरधरां रत्नहारोज्ज्वलां पराम् ॥
साधकाभीष्टदां सिद्धां सिद्धिदां सिद्धसेविताम् ।
एवं ध्यात्वा वकारं तु तन्मन्त्रं दशधा जपेत् ॥ व ॥

चतुर्भुजां चकोराक्षीं चारुचन्दनचर्चिताम् ।
शुक्लवर्णां त्रिनयनां वरदां च शुचिस्मिताम् ॥
रत्नालङ्कारभूषाढ्यां श्वेतमाल्योपशोभिताम् ।
देववृन्दैरभिवन्द्यां सेवितां मोक्षकाङ्क्षिभिः ॥
एवं ध्यात्वा शकारं तु तन्मन्त्रं दशधा जपेत् ॥ श ॥

शुक्लाम्बरां शुक्लवर्णां द्विभुजां रक्तलोचनाम् ।
श्वेतचन्दनलिप्ताङ्गीं मुक्ताहारोपशोभिताम् ॥
गन्धर्वगीयमानाञ्च सदानन्दमयीं पराम् ।
अष्टसिद्धिप्रदां नित्यां भक्तानन्दविवर्द्धिनीम् ।
एवं ध्यात्वा षकारं तु तन्मन्त्रं दशधा जपेत् ॥ ष ॥

करीषभूषिताङ्गीं च साट्टहासां दिगम्बरीम् ।
अस्थिमाल्यामष्टभुजां वरदामम्बुजेक्षणाम् ।
नागेन्द्रहारभूषाढ्यां जटामुकुटमण्डिताम् ॥
सर्वसिद्धिप्रदां नित्यां धर्मकामार्थमोक्षदाम् ।
एवं ध्यात्वा सकारं तु तन्मन्त्रं दशधा जपेत् ॥ स ॥

चतुर्भुजां रक्तवर्णां शुक्लाम्बरविभूषिताम् ।
रत्नालङ्कारसंयुक्तां वरदां पद्मलोचनाम् ॥
ईषद्धास्यमुखीं लोलां रक्तचन्दनचर्चिताम् ।
.........चतुर्वर्गप्रदां सौम्यां मनोहराम् ।
गन्धर्वसिद्धदेवाद्यैर्ध्यातामाद्यां सुरेश्वरीम् ।
एवं ध्यात्वां हकारं तु तन्मन्त्रं दशधा जपेत् ॥ ह ॥

परिशिष्ट ४

मात्रिकाओं पर ऐतिहासिक दृष्टि

वैदिक[1] साहित्य में मातृका

ऋग्वेद (१।१०२।४) में सोम बनाने के वर्णन में सात माताओं का उल्लेख है।

अस्यवामीय सूक्त के—

सप्त युंञ्जन्ति रथमेकचक्र-
मेको अश्वो वहति सप्तनामा । २ ।
इमं रथमधि ये सप्त तस्थुः
सप्तचक्रं सप्त वहन्त्यश्वाः ।
सप्तस्वसारो अभि सं नवन्ते
यत्र गवां निहिता सप्त नाम । ३ ।
अक्षरेण मिमते सप्त वाणीः । ४ ।

इन मन्त्रों में सप्तमातृकाओं का सन्धान करना असङ्गत न होगा ।

स्मृति-पुराणादिकों में मातृका

[2]गोभिलस्मृति (१।११-१२) ने १४ मातृकाओं, मार्कण्डेयपुराण (८८।११-

---

१. श्री पी. वी. काणे ने 'धर्मशास्त्र के इतिहास' में लिखा है कि गृह्य-सूत्रों में मातृका की चर्चा नहीं मिलती । किन्तु आगे चलकर नामकरणसंस्कार के प्रकरण में वहीं इन्होंने स्वीकार किया है कि हिरण्यकेशि गृह्यसूत्र ने १२ आहुतियों की चर्चा की है जिनमें ४ मातृकाओं को, ४ अनुमति को २ राका को एवं २ सिनीवाली को दी जाती हैं ।

२. गभिलस्मृति, प्रथम प्रपाठक :—

गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ ११ ॥
धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह ।
गणेशेनाधिकास्त्वेता वृद्धौ पूज्याश्चतुर्दश (षोडश) ॥ १२ ॥

२० एवं ३३) ने मातृगण के नाम से ७ माताओं, मत्स्यपुराण[1] (१७९।९-३१) ने एक सौ से अधिक माता देवियों के नाम गिनाये गये हैं। वराहमिहिर की

> कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः।
> पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः ॥ १३ ॥
>
> प्रतिमासु च शुभ्रासु लिखित्वा वा पटादिषु।
> अपि वाऽक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः ॥ १४ ॥
>
> कुडचलग्नां वसोर्धारां सप्तधारां घृतेन तु।
> कारयेत्पश्चधारां वा नातिनीचां न चोच्छ्रिताम् ॥ १५ ॥
>
> अनिष्ट्वा तु पितॄन् श्राद्धे न कुर्यात्कर्मवैदिकम्।
> तत्रापि मातरः पूर्वं पूजनीयाः प्रयत्नतः ॥ १६ ॥

१. मत्स्यपुराण १९७ अध्याय :—

ऋषय ऊचुः।

> श्रुतः पद्मोद्भवस्तात विस्तरेण त्वयोदितः।
> समासाद्भवमाहात्म्यं भैरवस्य विधीयताम् ॥ १ ॥

सूत उवाच।

> तस्यापि देवदेवस्य शृणुध्वं कर्म चोत्तमम्।
> आसीद् दैत्योऽन्धको नाम भिन्नाञ्जनचयोपमः ॥ २ ॥
>
> तपसा महता युक्तो ह्यवध्यस्त्रिदिवौकसाम्।
> स कदाचिन्महादेवं पार्वत्या सहितं प्रभुम् ॥ ३ ॥
>
> क्रीडमानं तदा दृष्ट्वा हर्तुं देवीं प्रचक्रमे।
> तस्य युद्धं तदा घोरमभवत्सह शम्भुना ॥ ४ ॥
>
> आवन्त्ये विषये घोरे महाकालवनं प्रति।
> तस्मिन्युद्धे तदा रुद्रश्चान्धकेनातिपीडितः ॥ ५ ॥
>
> सुषुवे बाणमत्युग्रं नाम्ना पाशुपतं हि तत्।
> रुद्रबाणविनिर्भेदाद्रुधिरादन्धकस्य तु ॥ ६ ॥
>
> अन्धकाश्च समुत्पन्नाः शतशोऽथ सहस्रशः।
> तेषां विदार्यमाणानां रुधिरादपरे पुनः ॥ ७ ॥
>
> बभूवुरन्धका घोरा यैर्व्याप्तमखिलं जगत्।
> एवं मायाविनं दृष्टवा तञ्च देवस्तथान्धकम् ॥ ८ ॥

बृहत्संहिता (५८।५६) में मातृदेवियों की मूर्तियों की ओर सङ्केत है । कृत्य-
रत्नाकर ने सात माताओं की मूर्तियों की चर्चा की है। देवी पुराण में मातृका-

अभिलेखों में मातृका

विश्ववर्मन् का गंगधार लेख

(मालव सं० ४८०–सन् ४२३-२४)—

मातॄणाञ्च प्रमुदितघनात्यर्थनिर्ह्रादिनीनाम् ।
तन्त्रोद्भूतप्रबलपवनोद्वर्तिताम्भोनिधीनाम् ।

माया विचित्ररूपा च कामरूपा च सङ्गमा ।
मुखे विला मङ्गला च महानासा महामुखी ॥ २१ ॥

कुमारी रोचना भीमा सदाहासा मदोद्धता ।
अलम्बाक्षी कालपर्णी कुम्भकर्णी महासुरी ॥ २२ ॥

केशिनी शङ्खिनी लम्बा पिङ्गला लेहितामुखी ।
घण्टारवाथ दंष्ट्राला रोचना काकजङ्घिका ॥ २३ ॥

गोकर्णिकाऽजमुखिका महाग्रीवा महामुखी ।
उल्कामुखी धूमशिखा कम्पिनी परिकम्पिनी ॥ २४ ॥

मोहना कम्पना क्ष्वेला निर्भया बाहुशालिनी ।
सर्पकर्णी तथैकाक्षी विशोका नन्दिनी तथा ॥ २५ ॥

ज्योत्स्नामुखी च रभसा निकुम्भा रक्तकम्पना ।
अविकारा महाचित्रा चन्द्रसेना मनोरमा ॥ २६ ॥

अदर्शना हरत्पापा मातङ्गी लम्बमेखला ।
अबाला वञ्चना काली प्रमोदा लाङ्गलावती ॥ २७ ॥

चिन्ता चित्तजला कोणा शान्तिकाघविनाशिनी ।
लम्बस्तनी लम्बसटा विसटा वासचूर्णिनी ॥ २८ ॥

स्खलन्ती दीर्घकेशी च सुचिरा सुन्दरी शुभा ।
अधोमुखी कटुमुखी क्रोधनी च तथाशनी ॥ २९ ॥

कुटुम्बिका मुक्तिका च चन्द्रिका बलमोहिनी ।
सामान्या हासिनी लम्बा कोविदारी समासवी ॥ ३० ॥

शङ्कुकर्णी महानादा महादेवी महोदरी ।
हुङ्कारी रुद्रसटा रुद्रेशी भूतडामरी ॥ ३१ ॥

पिण्डजिह्वा चलज्ज्वाला शिवा ज्वालामुखी तथा ।
एताश्चान्याश्च देवेशः सोऽसृजन्मातरस्तदा ॥ ३२ ॥

··················गतमिदं डाकिनीसम्प्रकीर्णम् ।
वेश्मात्युग्रं नृपतिसचिवो (ऽ–) कारयत्पुण्यहेतोः ।। २३ ।।

यहाँ विश्ववर्मा के मन्त्री मयूराक्ष द्वारा बनवाये गये मातृ-वेश्म की चर्चा की गई है ।

स्कन्दगुप्त का विहारस्तम्भ लेख—

भद्रार्यया भाति गृहं नवाभ्रनिर्मोकनिर्मुक्त······।। ८ ।।
स्कन्दप्रधानैर्भुवि मातृभिश्च
लोकान्स सुष्य··················।। ९ ।।

संस्कृत-साहित्य में मातृका

मृच्छकटिक, अङ्क १ :—

चारुदत्त :—तद्वयस्य । कृतो मया गृहदेवताभ्यो बलिः । गच्छ, त्वमपि चतुष्पथे मातृभ्यो बलिमुपहर ।

कादम्बरी, अनुच्छेद ६४ :—

अभिनवलिखितमातृपटपूजाव्यग्रधात्रीजनम् ।

प्रस्तरकला में मातृका

दक्षिण में इलोरा की गुहा में सप्तमातृका की सुन्दर मूर्तियाँ हैं । मथुरा तथा काशी-कला भवन में भी इनकी मूर्तियाँ सुरक्षित हैं ।

जबलपुर से बारह मील पर भेड़ाघाट नामक नर्मदा का प्रपात है । वहाँ संगमर्मर की चट्टानों पर गौरीशङ्कर जी के मन्दिर में चौसठ योगिनियों की मूर्तियाँ हैं इन्हें चौसठ वर्ण-मातृका समझना अनुचित न होगा ।

ओङ्कारेश्वर से तीन मील पूर्व नर्मदा के तट पर एक शक्तिपीठ है । यह स्थान सातमात्रा के नाम से कहा जाता है । इसका शुद्ध नाम सप्तमातृका है । यहाँ ब्राह्मी आदि सात मातृकाओं के मन्दिर हैं ।

मोहनजोदड़ो के उत्खनन में माता-देवियों की आकृतियों की उपलब्धि की बात सर जॉन मार्शल के एतद्विषयक ग्रन्थों (जि० १, पृष्ठ ७ एवं ४९-५२ तथा चित्र १२, ५४ और ५५) से ज्ञात होती है ।

कादम्बरी के अनुच्छेद ५६ में मातृ-भवन की चर्चा आई है । मातृदेवियों की पूजा के लिए प्रायः प्रत्येक गाँव के पास मातृ-भवन होता था जिसमें अनेक

मातृदेवियों की मूर्तियाँ स्थापित की जाती थीं। अहिच्छत्रा की खुदाई में एक मातृभवन पाया गया था जिसमें मातृदेवियों की पचासों मूर्तियाँ मिली थीं।—
'कादम्बरी : एक अध्ययन'।

यज्ञोपवीत तथा विवाह संस्कार में आज भी दीवाल पर मातृकाओं की स्थापना की जाती है जिसे 'माई थापना' कहते हैं। संस्कार के अनन्तर मातृकाओं का विसर्जन भी निकटस्थ सरोवर में किया जाता है।

उद्धृत सहायक ग्रन्थों की सूची

संस्कृत

	ग्रन्थ	लेखक
१	अणुभाष्य (ब्रह्मसूत्र-भाष्य)	श्री बल्लभाचार्य
२	आश्वलायनश्रौतसूत्र	
३	ईश्वरप्रत्यभिज्ञा	उत्पलाचार्य
४	ईश्वर-प्रत्यभिज्ञा-विवृति-विमर्शिनी	आचार्य अभिनवगुप्त
५	उत्पलवृत्ति (शिवदृष्टि-वृत्ति)	उत्पलाचार्य
६	उत्तररामचरित	भवभूति
७	उद्योत (स्वच्छन्दतन्त्र की टीका)	क्षेमराज
८	ऋग्वेद	
९	ऋग्विधान	शौनक
१०	ऋगर्थदीपिका (ऋग्वेदभाष्य)	वेङ्कटमाधव
११	कठोपनिषद्	
१२	कर्पूरादिस्तोत्र	महाकाल
१३	कात्यायनश्रौतसूत्र	
१४	कामधेनु (काव्यालङ्कारसूत्र-टीका)	गोपेन्द्रत्रिपुरहरभूपाल

३१	त्रिपुरामहिम्नस्तोत्रटीका	नित्यानन्द
३२	दीपिका (योगिनीहृदय-टीका)	अमृतानन्दयोगी
३३	दुर्गासप्तशती	
३४	देव्यथर्वशीर्ष उपनिषद्	
३५	नन्दिकेश्वरकाशिका	नन्दिकेश्वर
३६	नित्या षोडशिकार्णव (वामकेश्वर तन्त्रान्तर्गत)	
३७	निरुक्त	यास्काचार्य
३८	नेत्रतन्त्र	
३९	नेत्रतन्त्रोद्योत	क्षेमराज
४०	पञ्चस्तवी	कालिदास
४१	पदप्रकाश (वाक्यपदीय-टीका)	हेलाराज
४२	पदार्थादर्श (शारदा-तिलक-तन्त्र-टीका)	राघवभट्ट
४३	परशुरामकल्पसूत्र	परशुराम
४४	परात्रिंशिका	अभिनवगुप्त
४५	पाणिनीयशिक्षा	पाणिनि
४६	पूर्वपाणिनीयसूत्र	,,
४७	प्रकाश (वाक्यपदीय-टीका)	पुण्यराज
४८	प्रकारान्तरमन्त्राभिधान (तन्त्राभिधानान्तर्गत)	
४९	प्रश्नोपनिषद्	
५०	प्रपञ्चसारतन्त्र	शङ्कराचार्य
५१	प्रयोगक्रमदीपिका (प्रपञ्चसा० त० विवरण-टीका)	अज्ञातकर्तृक
५२	भास्करी-भूमिका	डा० के० सी० पाण्डेय
५३	मन्त्राभिधान	
५४	महार्थमञ्जरी	गोरक्षापरपर्याय महेश्वरानन्द
५५	महाभाष्य	पतञ्जलि
५६	महिम्नस्तोत्र	पुष्पदन्त
५७	मातृकाचक्रविवेक	
५८	मातृकानिघण्टु	
५९	मातृकाविलास	वंशीधर सङ्कलित
६०	मालिनीविजयोत्तरतन्त्र	
६१	मिताक्षरा	विज्ञानेश्वर
६२	यजुर्वेद (मा० सं०)	

६३ याज्ञवल्क्यस्मृति
६४ योगसूत्र — पतञ्जलि
६५ योगिनीहृदय (वामकेश्वर तन्त्रान्तर्गत)
६६ रघुवंश — कालिदास
६७ ललितासहस्रनाम (ब्रह्माण्डपुराणान्तर्गत)
६८ लक्ष्मीधरा (सौन्दर्य-लहरी-टीका) — लक्ष्मीधर
६९ लोचन (ध्वन्यालोकटीका) — अभिनवगुप्त
७० वरिवस्यारहस्य — भास्करराय
७१ वरिवस्यारहस्यप्रकाश — ,,
७२ वाक्यपदीय — भर्तृहरि
७३ वाचस्पत्यम् (कोष)
७४ वायवीयसंहिता (शिवपुराणान्तर्गत)
७५ वामकेश्वरीमतम्
७६ वामकेश्वरीमतविवरण — राजानक जयरथ
७७ विवरण (प्रपञ्चसारतन्त्र-टीका) — पद्मपादाचार्य
७८ विवेक (तन्त्रालोक-टीका) — राजानक जयरथ
७९ विज्ञानभैरवतन्त्र
८० विज्ञानभैरवविवृति — शिवोपाध्याय
८१ विज्ञानभैरवोद्योत — क्षेमराज
८२ वेदान्तपारिजात (ब्रह्मसूत्रभाष्य) — निम्बार्काचार्य
८३ वेददीप (माध्यन्दिन-संहिता-भाष्य) — महीधर
८४ बृहदारण्यक उपनिषद्
८५ ब्रह्मसूत्र — वादरायण
८६ शक्तिमहिम्नस्तोत्र — क्रोधभट्टारक-दुर्वासा
८७ शतपथब्राह्मण
८८ शारदातिलक तन्त्र — लक्ष्मणदेशिकेन्द्र
८९ शिवसूत्र
९० शिवदृष्टि — सोमानन्दपाद
९१ शिवसूत्रवार्तिक — भट्टभास्कराचार्य
९२ शिवसूत्रविमर्शिनी — क्षेमराज
९३ श्रीकरभाष्य — श्रीपतिपण्डित
९४ श्रीकण्ठभाष्य — श्रीकण्ठ
९५ श्रीमद्भगवद्गीता
९६ साम्बपञ्चाशिका

९७	सांख्यप्रवचनभाष्य	विज्ञानभिक्षु
९८	सूतसंहिता	
९९	सेतुबन्ध (नित्याषोड० टीका)	भास्करराय
१००	सौभाग्यभास्कर (ललितास० टीका)	,,
१०१	सौन्दर्यलहरी	शङ्कराचार्य
१०२	स्वच्छन्दतन्त्र	
१०३	स्फोटसिद्धि	भरतमिश्र
१०४	स्पन्दकारिका	वसुगुप्त
१०५	स्पन्दसन्दोह	क्षेमराज

हिन्दी

१०६	रामचरितमानस	सन्तकवि तुलसीदास

अंग्रेजी

१०७	गारलैण्ड आफ लेटर्स	सर जान उडरफ
१०८	कश्मीर शैविज्म	जगदीशचन्द्र चटर्जी
१०९	ऋग्वेदिक कल्चर आफ दि प्रिहिस्टारिक इण्डस	स्वामी शङ्करानन्द

अनुद्धृत सहायक ग्रन्थों की सूची

संस्कृत

१ अजड़प्रमातृसिद्धि — उत्पलदेव
२ ईशानशिवगुरुदेवपद्धति — सं० गणपति शास्त्री
३ कुलचूड़ामणि तन्त्र
४ तन्त्रसमुच्चय
५ ताराभक्तिसुधार्णव
६ त्रिपुरारहस्य, ज्ञानखण्ड
७ प्राणतोषिणीतन्त्र — रामतोष भट्टाचार्य
८ महानिर्वाणतन्त्र
९ माहेश्वरतन्त्र
१० मेरुतन्त्र
११ मृगेन्द्रतन्त्र
१२ रुद्रयामल (उत्तरतन्त्र)
१३ शक्तिसङ्गमतन्त्र
१४ श्री दक्षिणामूर्तिसंहिता

हिन्दी

१५ तान्त्रिक दृष्टि (कल्याण-साधनाङ्क)
महामहोपाध्याय डा० गोपीनाथ कविराज
१६ शक्तिपात-रहस्य ,, — ,,
१७ शक्तिसाधना (कल्याण शक्ति अङ्क) — ,,
१८ शाक्ताद्वैतवाद ,, — पं० वीरमणिप्रसाद उपाध्याय
१९ श्रीयन्त्र का स्वरूप ,, — ललिताप्रसाद डबराल
२० शक्ति सम्बन्धी साहित्य (कल्याण शक्ति अङ्क) — दीवानबहादुर श्री नर्मदाशङ्कर देवशङ्कर मेहता

अंग्रेजी

२१ अभिनवगुप्त — डा० के० सी पाण्डेय
२२ हिन्दू मिस्टिसिज्म, भाग २ — सरजान उडरफ
मिस्टिसिज्म आफ दि तन्त्राज (आर्थर अवलन)
२३ इन्ट्रोडक्शन टु तन्त्र-शास्त्र — ,,

२४	इन्ट्रोडक्शन (त्रिपुरारहस्य)	पं० गोपीनाथ कविराज
२५	लाइट्स आन दि तन्त्राज़	एम० पी० पण्डित
२६	महामाया : दि वर्ल्ड ऐज़ पावर : पावर ऐज़ कांशसनेस	सरजान उडरफ
२७	प्रिंसिपल आफ तन्त्र	प्रमथनाथ मुखोपाध्याय
२८	शक्ति एण्ड शाक्त	सरजान उडरफ
२९	दि सरपेण्ट पावर	,,
३०	दि शाक्त पीठाज़	डी० सी० सरकार, एम० ए०, पी० एच० डी०

ग्रन्थकार-परिचयः

गङ्गाया गरिमाणं मौलिमुकुटसङ्घटितगिरिश्रेष्ठम् ।
गुरुणादरेण बिभ्रद्विलसत्यत्रोत्तरो देशः ॥ १ ॥

यत्रास्ते वैसवारावनिरखिलगुणखनिर्या जनिर्जितवराणा-
माराद्धाराप्रसाराभिगतशतमहारातिमारान्तकानाम् ।
श्रीवेनीमाधवानां विसरदसिलतोद्यद्यशःसौरभाणां,
जृम्भन्तेऽद्यापि येषां रणरमणकथाश्चारु-रानाभिधानाम् ॥ २ ॥

यस्याङ्के शोभते ग्रामः श्रीसुमेरुपुराभिधः ।
पूर्वाञ्चले सदानीरा भाति लोननदी मुदा ॥ ३ ॥

दक्षिणस्यां च खरही पलाशवनसंवृता ।
प्रतीच्यां वहती चैव वर्षासून्मदकलेवरा ॥ ४ ॥

वशिष्ठस्य गणे जात उपमन्युर्महायशाः ।
गोत्रप्रवर्तकः कश्चिदासीच्छैवोत्तमो महान् ॥ ५ ॥

वशिष्ठ इन्द्रप्रमदो महर्षिश्च भरद्वसुः ।

साहित्ये कृतधीरधीतिनिपुणैरन्तेवसद्भिः सदा।
संवीतो नवनीतिकौशलजुषी यस्याभवच्छेमुषी ॥
गीतागानचणः पितृव्यचरणो जैरामसंज्ञः सुधीः।
वैदुष्यं हि वितीर्य मे सुरगिरो मामञ्जसान्वग्रहीत् ॥ १० ॥

श्रुत्यन्ते प्रथिता मतिः स्मृतिपुराणादौ च पूर्णा गति-
र्यस्याभूद्रघुवंश इत्यभिधया ख्यातः पितृव्यो गुरुः।
संसत्सु प्रतिवादिवृन्दविभदीकारप्रकारे पटु-
र्मुम्बाया नगरे वसञ्शुचिधिया लेभेऽवदातं यशः ॥ ११ ॥

अष्टाध्यायी हि यस्याः स्मृतिसरणिमिता या क्रमव्युत्क्रमेण,
तस्या अङ्के स्वतातस्वसुरखिलमहो शैशवं येन नीतम्।
कौमुद्याः फक्किकासु प्रणिहितहृदयः शेखरप्रोतचित्तः।
ब्रह्मानन्दाभिधानः गुरुरपर इहाऽभूद्यस्य धन्यो पितृव्यः ॥ १२ ॥

सूर्यनारायणः शुक्लो वाराणस्यां गुरुर्मम।
आसीज्ज्ञानरुचौ सूर्यनारायण इवापरः ॥ १३ ॥

नित्यं रसावसेकाज्जीवनधारां प्रपूरयन्ती या।
श्रीरिव गेहे कलिता सा मे ललिता सती भाति ॥ १४ ॥

तत्तिग्मांशोर्दहरकुहरे चेतसालम्ब्य बिम्बं
तत्राम्बाया विरचितवता चारु पञ्चोपचारम्।
नित्यं सक्तेन हि जपविधौ भूयसा वेदमातु—
रन्तर्यागप्रकटविधिनोत्थापिता नागकन्या ॥ १५ ॥

सिन्दूरारुणतरुणीं तरणीं भवजालजलधिहरीणाम्।
करुणावीक्षणनिपुणामम्बामविलम्बमालम्बे ॥ १६ ॥